CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.B.

Coll. No. 771

Title Trptidipa

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 771 Subject: Vedānta.

Title: Tṛptidīpa

Author: Vidyāraṇya Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 11.2" by 5.2" Extent: 30 to 65 foll.

Language: Sanskrit. Script: Devanāgarī

Remarks: Begins abruptly.

तद्वज्ञानाचारेपिप्रवृत्तिःस्यादित्याशंक्याह ॥ अतिप्रसंगइति ॥ प्रारब्धवशादेवातिप्रसंगोऽपिस्यादित्याशंक्याशंकांनिरा
करोति ॥ अशक्तेति ॥ ३१ ॥ ननुज्ञान्यज्ञानिनोःप्रारब्धकर्मण्येवत्वपक्षोक्तमतयासमानेतयोःकुतोवैलक्ष
ण्यसिद्धिरित्याशंक्याह ॥ ज्ञानिनइति ॥ ३२ ॥ तत्रदृष्टांतमाह ॥ मार्गइति ॥ ३३ ॥ इत्थमुपपादितमात्मानंचे

अतिप्रसंगोमाशंक्यःस्वकर्मवशवर्तिनां ॥ अशक्तवाक्येनशक्येतकर्मवारयितुंवद ॥ ३१ ॥ ज्ञा
निनोज्ञानिनश्चात्रसमेप्रारब्धकर्मणि ॥ नक्लेशोज्ञानिनोधैर्यान्मूढःक्लिश्यत्यधैर्यतः ॥ ३२ ॥ मा
र्गेगंत्रोर्द्वयोःश्रांतोसमायामप्यदूरतां ॥ जानन्धैर्याद्द्रुतंगच्छेदन्यस्तिष्ठतिदीनधीः ॥ ३३ ॥ साक्षा
त्कृतात्मधीःसम्यग्विपर्ययबाधितः ॥ किमिच्छन्कस्यकामायशरीरमनुसंज्वरेत ॥ ३४ ॥

दितिमंत्रस्यपूर्वार्धार्थमनुवदन्फलप्रदर्शनपरमुत्तरार्धमवतारयति ॥ साक्षादिति ॥ सम्यक्साक्षा
त्कृतात्मधीःसाक्षात्कृतःआत्मायया सासाक्षात्कृतात्मातादृ

र्णधीर्यस्य स साक्षात्कृतमधीताः ॥ अविपर्ययबाधितः विपर्ययेण देहाद्यात्मबुद्ध्या बाधितो न भवतीति स
विपर्ययबाधितः उभयहेतुगर्भं विशेषणं ॥ २४ ॥ अस्य सम्यक्चारित्र्यतात्पर्यमाह ॥ जगदिति ॥ काम्यश्च कामु

जगन्मिथ्यात्वधीभावादाविर्भूतौ काम्यकामुकौ ॥ तयोरभावे संतापः शाम्येन्निःस्नेहदीप
वत् ॥ २५ ॥ ॥

कश्च काम्यकामुकौ भावाविर्भूतौ ॥ तन्निराकरणे कारणमाह जगन्मिथ्यात्वेति ॥ ततः किमित्यत्राह ॥ तयोरिति ॥ तयोः काम्यकामुकयोरभावे संतापः कामनानिमित्तकः ॥ कारणाभावान्निःस्नेह हं॰ टी॰
दीपवच्छाम्येदित्यर्थः ॥ २५ ॥ ॥ १८ ॥ ॥ ३०

काम्याभावात्कामनाभावः ॥ कुहदृष्टस्यनात्याह ॥ गंधर्वेति ॥ मायाविनिर्मितं पत्तनेन स्थितं वस्तु किंचिदपि इदमैंद्र
जालिकनिर्मितमिति जानन्न कामयते ॥ न केवलं कामनाभावः प्रत्युत इदमनृतमिति दर्शनं जिहासति परित्य
क्तुमिच्छति ॥ शङ्का ॥ दृष्टीति केयोजयति ॥ आपातेति ॥ एवमापातरमणीयेषु भवती ॥ भिन्नाचरम्येषु प्रपतत्

गंधर्वपत्तने किंचिन्नैंद्रजालिकनिर्मितं ॥ जानन्कामयते किंतु जिहासत्यहसन्निदं तिहसन्निदं ॥ २
६ ॥ आपातरमणीयेषु भोगेष्वेवंविचारवान् ॥ नानुरज्जति किंत्वेतेदोषदर्शी जिहासति ॥ २७

तिभोगा विषयाः स्रक्चंदनादयस्तेषु एवंविचारवानापातरमणीयत्वानुसंधानवान्नानुरज्जति ना
सक्तिं करोति किंतु दोषदर्शनेनैतान्परित्यक्तुमिच्छति ॥ २७ ॥ ॥

केते विषयदोषाः इत्यत आह । अर्थानामिति ॥ ३९ ॥ एवं विषयाणां दुःखहेतुत्वं प्रदर्श्य रागेण न त्यक्तं चक्क विद्वायति
मांसेति । स्नायवः शिरा । अस्थीनि पृष्ठिकानि यथ यो मांसम् निचयरूपानि तत्व सनादयः एतैः सहिता या मां
सपांचालिका याः पुत्तलिका या योषितो यंत्रलोलेयं चवच्चलन त्रीलिं ऽ गपंजरे अंगमेव पंजरं नीडं तस्मि

अर्थानामर्जने क्लेशस्तथैव परिपालने । नाशे दुःखं व्यये दुःखं धिगर्थान् क्लेशकारिणः ॥ ३९ ॥
मांसपांचालिकायास्तु यंत्रलोलेंगपंजरे । स्नाय्वस्थिग्रंथिशालिन्याः स्त्रियाः किमिव शोभनं
॥ ३९ ॥ एवमादिषु रागेष्वेषु दोषाः सम्यक् प्रपंचिताः । विमृश्यान्न निवर्तानि कथं दुःखेषु मज्ज
ति ॥ ४० ॥ ॥

•शरीरे किं शोभनमिव न किमपीत्यर्थः ॥ ३९ ॥ एवमादि विलासादिना दृष्टेन त्वन्मांसरक्त बाष्पाबुद्बुद
कृत्वा विलोचने । समालोकय रम्यं च किं मुधा परिमुह्यसीति वमादयो गृह्यंते ॥ ४० ॥ ॥

इ॰दी॰
३१

विषयदोषदर्शने सति रोगेच्छा मा वेद्युक्ति सहितं दृष्टांतमाह । क्षुधयेति । स्वयम् मूढो विवेकि दृष्टान्न
भोजनेन क्षुधा विनष्टा दृष्ट्वा हला आकांक्षायस्य स तथोक्तः रुदं विषमित्येवं जानं स्तद्विषं न जिघृक्षति नन्तु

क्षुधयापीड्यमानोपि न विषं ह्यत्तुमिच्छति । मृष्टान्नधूस्तदेहस्तु जानन्नाम् ऊढस्तज्जिघृक्षति ॥ ४१ ॥ प्रार
ब्धकर्मप्राबल्यात् भोगेष्विच्छा न वेद्यते । किं स्यान्नेवतदा प्यस्ये पश्चत्कैर्विष्टिगृहीतवत् ॥ ४२ ॥ जुंजानाना
अपि बुधाः शृण्वंतः कुटुंबिनः । नाद्यापि कर्मनिःछिन्नमिति क्लिश्यंति संततं ॥ ४३ ॥ ॥

पीड्यतीत्यर्थः ॥ ४१ ॥ ननु प्रारब्धकर्मणः प्रबलत्वात् ज्ञानिनोपीच्छा न वेदिता शंक्य तस्यां सत्याम पीच्छायांपी
तिपुरःसरं न त्वेकं इत्याह । प्रारब्धेति ॥ ४२ ॥ कथमितद्वगम्यतइत्याशंक्य लोके दर्शनादित्याह । जुंजाना
ना इति ॥ ४३ ॥

ननु तत्त्वविदां संसारनिमित्तकस्तापोऽनुपपन्नो वैराग्यपातादित्याशंक्याह । नायमिति । अयं क्लेशो रागाद्या
पिकर्मनिमित्तमित्येवमनुतापात्मकः संसारतापो न भवति । किंत्वत्र संसारे विरक्तताभ्यासकिरदितता
तापकतानावे युक्तिमाह । भ्रांतीति । हि यस्मात्कारणात् सांसारिकस्तापो भ्रांतिज्ञाननिदानः भ्रांतिज्ञाननिदान

नायं क्लेशोऽत्र संसारतापः किंतु विरक्तता । भ्रांतिज्ञाननिदानो हि तापः सांसारिकः स्मृतः ॥४४॥ विवेके
न परिक्लिष्टपन्नस्य भोगेन तृप्यति । अन्यथानंतभोगेऽपि नैव तृप्यति कर्हिचित् ॥४५॥ ॥

ःभ्रांतिज्ञानकारणकः स्मृतः पूर्वाचार्यैरयं तु विवेकज्ञानमूलत्वान्न तथाविध इत्यर्थः ॥४४॥ अयं क्लेशो हं॰टी॰
अविवेकमूलो विवेकमूलो वेति कुतोऽवगम्यत इत्याशंक्य ॥ कामनिवर्त्तकत्वाद्विवेकमूल इत्याह ॥ विवे ३२
केनेति ॥४५॥ ॥

विवेकिन इवाविवेकिनोऽपि भोगेनैव तृप्तिः स्यादतो विवेकोऽप्रयोजक इत्याशंक्य भोगस्य तृप्तिहेतुत्वाऽभा
वप्रतिपादिकां श्रुतिं पठति । न जात्विति ॥४६॥ विवेकमूलस्य भोगस्य तृप्तिहेतुत्वमनुभवसिद्धमित्याह
परिज्ञायेति । एवं भोग एतावानेवं प्रयाससाध्य इत्येवमनुभवपूर्वकमेदं बुद्धिहेतुर्हरपत इत्यर्थः

न जातु कामः कामानामुपभोगेन शाम्यति । हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते ॥४६॥ परि
ज्ञायोपभुक्तो हि भोगो भवति तुष्टये । विज्ञाय सेवितश्चोरो मैत्रीमेति न चोरतां ॥४७॥

ननु ज्ञानाद्धेतोर्भोगस्य विवेकसाहचर्यमात्रेण कथं तुष्टिकरत्वमित्याशंक्य । सहचारिविशेषवशाद्वि
परीतकार्यकरत्वं लोके दृष्टमित्याह । विज्ञायेति । अयं चोर इति ज्ञात्वा तेषां न सेव्यमानस्य पुरुष
स्य न चोरो भवति किंतु मित्रतामेतीत्यर्थः ॥४७॥ ॥

ननुकामनाख्यस्य तावन्मनसः कथं स्वल्पभोगेन तृप्तिः स्यादित्याशंक्य निदिध्यासनेन निगृहीतस्य तथा
ताज्ञवस्यैव तृप्तिरित्याह ॥ मनस इति ॥ निगृहीतस्य योगाभ्यासेन वशीकृतस्य मनसः स्वल्पकोपि स्व
ल्पोपि लीला भोगो लीलानुभवो योस्ति अलब्धविस्तारमप्राप्तबाहुल्यं तमेव भोगं क्लिष्टत्वाद्दोषयुक्त

मनसो निगृहीतस्य लीलाभोगोल्पकोपि यः ॥ तमेवालब्धविस्तारं क्लिष्टत्वाद्बहु मन्यते ॥ ४८
बद्धमुक्तो महीपालो ग्राममात्रेण तुष्यति ॥ परैर्न बद्धो नाक्रांतो न राष्ट्रं बहु मन्यते ॥ ४९ ॥

त्वाद्बहु मन्यतेऽधिकत्वेन जानातीत्यर्थः ॥ ४८ ॥ निगृहीतस्य मनसः स्वल्पेनापि भोगेन तृप्तिर्भवतीत्यत्र दृष्टां तृ॰दी॰
तमाह ॥ बद्धमुक्त इति ॥ ४९ ॥ ॥ ३२

ननु प्रारब्धकर्मप्राबल्याद्भोगेच्छा विद्वानवेद्यदीस्यत्तत्कर्मवशादित्याशंक्य वेदिमुक्त ॥ तदनुपपन्नमिच्छाविद्या
तिनि विवेकज्ञाने मति तदुत्पत्त्यसंभवादिति शंकते ॥ विवेक इति ॥ ५० ॥ दोषदर्शने सति स्वपीडाजन्मसंभ

विवेके जाग्रति सति दोषदर्शनलक्षणे ॥ कथमारब्धकर्मापि भोगेच्छां जनयिष्यति ॥ ५० ॥ नै
ष दोषो यतोनेकविधं प्रारब्धमीक्ष्यते ॥ इच्छानिच्छा परेच्छा च प्रारब्धं त्रिविधं स्मृतं ॥ ५१ ॥ अ
पथ्यसेविनश्चोरा राजदाररता अपि ॥ जानंत एव स्वानर्थमिच्छंत्यारब्धकर्मतः ॥ ५२ ॥ ॥

विष्यति ॥ प्रारब्धस्य नानाप्रकारत्वादिति परिहरति ॥ नैष दोष इति ॥ नानाप्रकारत्वमेव दर्शयति ॥ इ
च्छेति ॥ इच्छाजनकमनिच्छया भोगप्रदं परेच्छया भोगप्रदं चेति त्रिविधमित्यर्थः ॥ ५१ ॥ इच्छाप्रारब्धं
दर्शयति ॥ अपथ्यसेविन इति ॥ ५२ ॥ ॥

परिहारार्थत्वादिसंगतिं प्रेरयाह नचात्रेनदिति अत्राऽस्मिन्लोके अपथ्यादीछतीत्येतदस्यार्थः अपथ्यसेवादी
च्छायाः प्रारब्धफलत्वं कुतोऽवगम्यत इत्याशंक्यपरिहारत्वादिसंनिप्रेरयाह॥ नचात्रेनदिति॥ अत्राऽस्मिन्लो
केऽपथ्यादीछतीत्येतत्कुत इत्यतआह॥ यतइति॥ ५३॥ गीतावाक्यं पठति सदृशमिति॥ विवेकज्ञान
वानपिपुरुषः स्वस्याः स्वकीयायाः प्रकृतेः सदृशमनुरूपं चेष्टते॥ प्रकृतिर्नाम पूर्वकृतधर्माधर्मादिसंस्कारो वर्तमानजन्मादावभिव्यक्तः ज्ञानवानपिकिमुतमूर्खः तस्मात्प्रकृतिं यांति भूतानि निग्रहः प्रहतिनिग्रहस्तोनिरोधो मयान्येन वाकृतः किं करिष्यति न किमपीत्यर्थः॥ ५४॥ ॥ ॥ टी. २४

नचाचैतद्वारयितुमीश्वरेणापिशक्यते॥ यतईश्वरएवाह गीतायामर्जुनंप्रति॥ ५३॥ सदृशंचे
ष्टतेस्वस्याः प्रकृतेर्ज्ञानवानपि॥ प्रकृतिंयांतिभूतानिनिग्रहः किं करिष्यति॥ ५४॥ ॥

तीव्रप्रारब्धस्यापरिहारार्थत्वेवचनांतरसंमतिमाह॥ अवश्यमिति॥ अवश्यंभाविभावानां दुःखानामित्यर्थः
५५॥ प्रारब्धस्यापरिहारार्थत्वेतत्परिहाराऽसमर्थस्येश्वरस्यानीश्वरत्वप्रसंग इत्याशंक्याह॥ नचेति॥ कुतइ
त्यतआह॥ यतइति॥ यतः कारणादेषांदुःखादीनामवश्यंभाविताऽपीश्वरेणैवनिर्मिताऽतोनानीश्वरत्वप्रसं

अवश्यंभाविभावानांप्रतीकारोभवेद्यदि॥ तदादुःखैर्नलिप्येरन्नलरामयुधिष्ठिराः॥ ५५॥ नचेश्वर
त्वमीशस्यहीयतेतावतायतः॥ अवश्यंभाविताप्येषामीश्वरेणैवनिर्मिता॥ ५६॥ प्रश्नोत्तराभ्यामेवै
तद्गम्यतेऽर्जुनकृष्णयोः॥ अनिच्छापूर्वकंचास्तिप्रारब्धमिपितच्छृणु॥ ५७॥ ॥

गमाइत्यर्थः॥ ५६॥ एवंसप्रपंचमिच्छाप्रारब्धमभिधायानिच्छाप्रारब्धंवक्तुमारभतेप्रश्नोत्तराभ्यामिति
अनिच्छापूर्वकंचप्रारब्धमिस्तिएतदर्जुनकृष्णयोः प्रश्नोत्तराभ्यामेवगम्यतेज्ञायतइतियोजना॥ तद
भिधानायशिष्यमभिमुखीकरोति॥ तच्छृणुइति॥ ५७॥ ॥

प्रतत्रार्जुनयोरस्य प्रश्नंतावद्दर्शयति ॥ अथकेनेति ॥ हेवार्ष्णेयवृष्णिसंबंधिन ॥ अयंपुरुषःकेनप्रयुक्तःप्रे प्र
रितःअनिच्छन्नपिइच्छामकुर्वन्नपिराज्ञाबलान्नियोजितइवपापंचरतिआचरति ॥३६॥ अत्रोत्तरमा
ह ॥ कामएषइति ॥ एषपुरुषप्रवर्त्तकोरजोगुणसमुद्भवःउत्पत्तिर्यस्यसः रजोगुणसमुद्भवःकामःएषप्र
सिद्धोयंकामःकदाचित्क्रोधरूपेणापिपरिणमतेततःक्रोधःसएवपुनःकीदृशःमहाशनःमहदशनंविष

अथकेनप्रयुक्तोयंपापंचरतिपूरुषः ॥ अनिच्छन्नपिवार्ष्णेयबलादिवनियोजितः ॥३६॥
कामएषक्रोधएषरजोगुणसमुद्भवः ॥ महाशनोमहापाप्माविद्ध्येनमिहवैरिणं ॥३७॥ ॥

यज्ञातंयस्यसमहाशनः ॥ महापाप्माअत्युग्रः ॥ पापस्यहेतुत्वादुपचारान्महापाप्मत्वमस्य ॥ अतइहसंसा
रेएनंकामंक्रोधरूपंवैरिणंविद्धि ॥ अयमभिप्रायः ॥ प्रारब्धवशादुज्जिरजोगुणकार्ययोःकामक्रो टी.
धयोरन्यतरस्यैवपुरुषप्रवर्त्तकत्वेनप्रवृत्तिनीरिक्षायादृति ॥३७॥ ॥ ३५

ननुअत्रकामक्रोधयोरेवपुरुषप्रवर्त्तकत्वमुपलभ्यतेनानिच्छाप्रारब्धस्येत्याशंक्य ॥ तस्यैवप्रवर्त्तकत्व
प्रतिपादकंतद्वाक्यंपठति ॥ स्वभावजेनेति ॥ हेकौंतेयस्वेनैवानुष्ठितेनातएवस्वकीयेनप्रारब्धे
नकर्मणानिबद्धःसन्यत्कर्त्तुंनेच्छसितदपिमोहादविवेकतःअवशःपरवशःकरिष्यसीत्यतो
निच्छाप्रारब्धमस्तीत्यभ्युपगंतव्यमितिभावः ॥६०॥ इदानींपरेच्छाप्रारब्धमप्यस्तीत्याह ॥ नानिच्छंत

स्वभावजेनकौंतेयनिबद्धःस्वेनकर्मणा ॥ कर्त्तुंनेच्छसियन्मोहात्करिष्यस्यवशोपि
तत् ॥६०॥ नानिच्छंतोनचेच्छंतःपरदाक्षिण्यसंयुताः ॥ सुखदुःखैर्भजंत्येतत्परेच्छापू
र्वकर्महि ॥६१॥

इति ॥ अनिच्छंतोपिनभवंतिइच्छंतोपिनभवंतिकिंतुपरदाक्षिण्यसंयुताः
संतस्तत्प्रीत्यर्थमेवसुखदुःखैर्जनतिअनुभवंति ॥ अतएतत्सुखादिकोगृहेतुभूतंपरेच्छापूर्व
कंप्रारब्धप्रसिद्धमित्यर्थः ॥ अतएवदोषदर्शनेस्यापिप्रारब्धस्यापरिहार्यत्वात्तस्येच्छाजनकत्वं
ननिवारयितुंशक्नोतीतिभावः ॥६१॥ ॥

ननुतत्ववदीद्देपीद्दांगीकारे किमित्थन्नितिकृतिविरोधे इतिशंकते ॥ कथमिति ॥ किमित्थन्नित्यनेन
वाक्येनकथमित्थंभावो वर्णितइत्यर्थः ॥ नानेनेत्थंभावोनिषिध्यते किंतु समस्तानामपि तस्याःसमर्थ्यंप्रवृ
त्तिजनकत्वंनास्तीतिबोध्यत इतिपरिहरति ॥ नेत्थेति ॥ स्वरूपेणसमस्तानामपि तस्यासामर्थ्यंरादि

कथंतर्हिकिमित्थन्नित्येवमित्थंननिषिध्यते ॥ नेत्थंनिषेधःकिंत्वित्थंबाधोनर्जितबीजवत्
६३ ॥ नर्जितानितुबीजानिसंत्यकार्यकराणिच ॥ विषयादिच्छातथैष्टम्यावाऽसत्वबोधान्नका
र्यकृत् ॥ ६४ ॥

सदृष्टांतमाह ॥ नर्जितेति ॥ ६३ ॥ संक्षेपेणोक्तमर्थंप्रपंचयति ॥ नर्जितानीति ॥ यथान
र्जितानिबीजानिस्वयंस्वरूपेणविद्यमानान्यपिनांकुरादिकार्यकराणिभवंति ॥ तथाविषयादिच्छा
स्वयंविद्यमानाऽपीष्यमाणपदार्थस्याऽसत्वज्ञानेनबाधितत्वान्नव्यसनादिकार्यक्षमेत्यर्थः ॥ ६४ ॥ हंदी-
३६

ननुतर्हिविदुषश्चैवंनांगीकर्तृकाफलाभावादिसात्तांकफलाभावोऽसिद्धोयोगलक्षणफलसद्भावा
दितिसदृष्टांतमाह ॥ दग्धबीजमिति ॥ दग्धंनर्जितमितियावत् ॥ व्यसनंविपदादिरूपंबहुविधं ॥ व्य
सनंविपदित्यंशोदोषेकामजकोपजइत्याभिधानात् ॥ ६४ ॥ ननुकथमेवंवियोगद्वाराव्यसनापिजनयेदि

दग्धबीजमरोहेऽपिनक्षणायोपयुज्यते ॥ विषयादिच्छाप्यल्पयोगंकुर्यान्नव्यसनंबहु ॥ ६४ ॥ योगेन
चरितार्थत्वात्प्रारब्धंकर्महीयते ॥ नोक्तव्यसनतातेनात्माव्यसनंतत्रजायते ॥ ६५ ॥ ॥

त्याशंक्याह ॥ योगेनेति ॥ प्रारब्धकर्मणोयोगमात्रहेतुत्वान्नव्यसनजनकत्वमित्यर्थः ॥ कुतस्तर्हिव्यसन
जन्मेत्यत्राह ॥ नोक्तव्येति ॥ तत्रतस्मिन्विषये ॥ ६५ ॥ ॥

नन्वत स्मिन्विषये व्यसनहेतुं भ्रमं दर्शयति । मा विनश्यत्विति । अयं भोगो मा विनश्यतु किंतूत्तरोत्तरं वर्ध
तां । विघ्नाश्चैनं मा प्रतिबध्नंतु प्रतिबंधं माकुर्वंतु अस्मादेव भोगादहं धन्यः । कृतार्थोस्मीत्येवं रूपो भ्रम
न्वतित्तत्त्वसनमित्यर्थः ॥१६६॥ प्रसंगाद्व्यसनपरिहारोपायमाह । यदभावीति । यदभावि तु मयोग्यं तन्न
भवेदेव भावि तु योग्यं चेन्न तदन्यथा न भवेदेवंविधो एवंरूपः चिंता विषघ्नः । इदं मे श्रेयः कदा संपत्स्यतीदम

मा विनश्यत्वयं भोगो वर्धतामुत्तरोत्तरं । मा विघ्नाः प्रतिबध्नंतु धन्योस्म्यस्मादिति भ्रम ॥१६६॥ य
दभावि न तद्भावि भावि चेन्न तदन्यथा । इति चिंताविषघ्नोयं बोधो भ्रमनिवर्तकः ॥१६७॥

निष्टं कदा निवर्तिष्यत इत्येवमादि चिंतैव विषमिव स्वसंसृष्टपुरुषस्य नाशहेतुत्वाद्विषमिदं चिंताविषं घ्नः
एवंभूतो यो बोधः सोयं भ्रमनिवर्तकः । सर्वेषां भ्रमस्य निवर्तक इत्यर्थः ॥१६७॥ तृ.दी.
२७

ननु विवेकविदुषोरुभयोरपि भोगित्वाविशेषे एकस्य व्यसनमपरस्य तु नेत्येतत्कुत इत्याशंक्य विपरी
तज्ञानवत्वात्तज्ञानवत्वाद्भ्रांतस्य व्यसनं भवति सम्यग्ज्ञानवतस्तु नेत्याह । समेपीति । बुद्धवान् ज्ञानवान् भ्रांतानात्मदर्शी । भ्रांतेः कथं व्यसन
तज्ञानवत्वादस्यात्मांतरस्य त्रिविधेत्याह । समेपीति । विवेकिनस्तु दर्शयति । मायामयत्वमिति ॥१६९॥ ननु मायामयत्व बो
हेतुत्वमित्यतआह । विवेकिनस्त्वदर्शनं दर्शयति मायामयत्वमिति ॥१६९॥ ननु मायामयत्वबो

समेपि भोगे व्यसनं भ्रांतो गच्छेन्न बुद्धवान् । अशक्यार्थस्य संकल्पाद्भ्रांतस्य व्यसनं बहु ॥१६८॥
मायामयत्वं भोगस्य बुद्ध्वास्थामुपसंहरन् । भुंजानोपि न संकल्पं कुरुते व्यसनं कुतः ॥१६९॥
मायामयत्वं भोगस्य बुद्ध्वास्थामुपसंहरन् । भुंजानोपि न संकल्पं कुरुते व्यसनं कुतः ॥१६९॥
स्वप्नेंद्रजालसदृशमचिंत्यरचनात्मकं । दृष्टनष्टं जगत्पश्यन्कथं तत्रानुरज्यति ॥१७०॥

धेस्य सपिनोगस्य तदानीं तनसुखहेतुता कुतश्चास्थोपसंहार इत्याशंक्य । बहुविधदोषदर्शना
दित्याह । स्वप्नेंद्रजालेति ॥१७०॥

ननु कस्त्विन्द्रजालसादृश्यादिज्ञाने सम्यासक्तिनावो न भवेत्तदेव कुतो जायत इत्याशंक्य तज्ज्ञानो
पायमाह। स्वस्वप्नमिति। स्वकीयं स्वप्नम् अपरोक्षतया दृष्ट्वा स्वकीयं च जागरम् अनुभवन्सन् जागरा
वुभावप्यप्रमत्तः सन् मुहुश्चिंतयेत्। स्वप्नतुल्योयं जागर इति॥७१॥ चिरं तयोरिति। एवं तयोः सर्व
साम्यं तात्कालिकभोगहेतुत्वपरिणतिविरसत्वविनाशित्वादिलक्षणं चिरम् अनुसंधाय जागरेपि

स्वस्वप्नमापरोक्ष्येण दृष्ट्वा पश्यन्स्वजागरं। चिंतयेदप्रमत्तः सन्नुभावनुदिनं मुहुः॥७१॥ चि
रं तयोः सर्वसाम्यमनुसंधाय जागरे। सत्यत्वबुद्धिं संत्यज्य नानुरज्यति पूर्ववत्॥७२॥

सत्यत्वबुद्धिं परित्यज्य जाग्रद्वस्तुष्वपि पूर्ववत्। जगत्सत्यत्वज्ञानदशायामिव नानुरज्यति॥ पं·दी
नानुरक्तो न भवतीत्यर्थः॥७२॥ ॥ २०

ननु प्रपंचगोचरस्य मिथ्यात्वज्ञानस्य विषयसत्यत्वोपजीविनो भोगस्य च परस्परविरोधान्मिथ्यात्वज्ञाने सति क
थं भोगसिद्धिरित्याशंक्य। भोगस्य विषयसत्वापेक्षाभावान्न विरोध इति परिहरति। इंद्रजालमिति। इदं द्वैतं भो
ग्यप्रजातम् अचिंत्यरचनत्वादिंद्रजालवन्मिथ्येति युक्त्यानुसंधाय अविस्मरतो विदुषः प्रारब्धभोगतः प्रारब्ध

इंद्रजालमिदं द्वैतमचिंत्यरचनात्वतः। इत्यविस्मरतो हानिः का वा प्रारब्धभोगतः॥७३॥

भोगतः। प्रारब्धकर्मफलयोः सुखदुःखयोरनुभवेन मिथ्यात्वानुसंधानस्य का वा हानिः वा प्रारब्धस्य मिथ्यात्वानु
संधानेन भोगस्य का हानिः विभिन्नविषयत्वादिति भावः॥७३॥ ॥

विभिन्नविषयत्वमेव दर्शयति। निर्बाध इति। तत्त्वविद्याया जगत्तत्त्वगोचरस्य ज्ञानस्य इंद्रजालवज्जगतो मिथ्यात्वानुसंधाने निर्बाधा न तु भोगापलापे प्रारब्धकर्मणश्च जीवस्य सुखदुःखयोः प्रदाने आग्रहो न तु भोग्यसत्यत्वापादन इति भावः॥७४॥ एवं विभिन्नविषयत्वं प्रदर्श्य प्रयोगमाह। विद्येति। विद्याप्रारब्धकर्मणी

निर्बाधस्तत्त्वविद्याया इंद्रजालत्वसंस्मृतौ। प्रारब्धस्याग्रहो भोगे जीवस्य सुखदुःखयोः॥७४॥
विद्यारब्धे विरुध्येते न भिन्नविषयत्वतः। जानद्भिरप्यैंद्रजालविनोदो दृश्यते खलु॥७५॥

परस्परं न विरुध्येते विभिन्नविषयत्वात् संप्रतिपन्नरूपरसज्ञानवदित्यर्थः। भोगप्रमिथ्यात्वज्ञाने भोगबाधकं न भवतीत्येतत्क्व दृष्टमित्याशंक्याह। जानद्भिरिति। इंद्रजालसंबंधी चमत्कारविशेषः जानद्भिरपींद्रजालत्वं जानद्भिरप्यवलोक्यत इति प्रसिद्धमित्यर्थः॥७५॥ ॥ ३८

किंच विद्याप्रारब्धकर्मणोर्विरोधोऽस्तीति वदन् प्रष्टव्यः किं प्रारब्धं स्वयं विद्याविरोधीत्युच्यते उत विद्याप्रारब्धकर्मविरोधिनीति। नाद्य इत्याह। जगत्सत्यत्वमिति। प्रारब्धं कर्म जगतो भोग्यजातस्य सत्यत्वमबाध्यत्वमापाद्य संपाद्य। यदि भोजयेज्जीवस्य सुखदुःखे दद्यात्तर्हि विद्याविषयस्य मिथ्यात्वस्यापहाराद्वि

जगत्सत्यत्वमापाद्य प्रारब्धं भोजयेद्यदि। तदा विरोधि विद्याया भोगमात्रान्न सत्यता॥७६॥
अनेन जायते भोगः कल्पितैः स्वप्नवस्तुभिः। जाग्रद्वस्तुभिरप्येवमसत्यैर्भोग इष्यतां॥७७॥

द्याया विरोधि स्यान्न च तथा करोति किंतु भोगमेव प्रापयति अतो न विद्याविरोधि प्रारब्धमिति भावः। भोगबलादेव भोग्यस्य सत्यत्वमपि स्यादित्याशंक्याह। भोगमात्रादिति। विमतं जगत्सत्यं भोग्यत्वात्स्वप्नवद् दृष्टांताभाव इति भावः॥७६॥ ननु मिथ्यापदार्थैर्भोगो न भवतीत्यत्राऽपि दृष्टांताभावा[illegible]शंक्याह अनेनेति॥७७॥ ॥

नापिद्वितीयइस्यात्॥ यदीति॥ विद्यायदिजगज्जीवोपजातंमपह्नुवीतनेदंरजतमितिनिषेधकज्ञानंवस्तु
तीयमानस्यभोगप्रदस्यस्वरूपंविलपयेत्॥ तदाप्रारब्धकर्मभोगप्रदस्यसुखदुःखानुभवस्यसाधनापहारेणप्रा
रब्धकर्मविघातिनीस्यात्नचतथाकरोतिकिंतुमिथ्यात्वमेवबोधयति॥ अतोनप्रारब्धकर्मविरोधिनीतिभा
वः॥ ननुमिथ्यात्वबोधनादेवस्वरूपमपिविलापयेदित्याशंक्याह॥ नेति॥ इंद्रजालादौस्वरूपविलाप

यदिविद्यापह्नुवीतजगत्प्रारब्धघातिनी॥ तदास्यान्नतुमायात्वबोधेनतदपह्नवः॥७८॥ अनप
ह्नुत्यलोकास्तदिंद्रजालमिदंत्विति॥ जानंत्येवानपह्नुत्यभोगंमायात्वधीस्तथा॥७९॥ ॥

नमंतरेणमिथ्यात्वज्ञानदर्शनादितिभावः॥७८॥ एतदेवप्रपंचयति॥ अनपह्नुत्येति॥ लोकाजनास्तदिंद्रजा
लस्वरूपमनपह्नुत्यानिरस्यमिंद्रजालमितिजानंतियथातथाभोगंचोपमनपह्नुत्यविलाप्यमाया इन्दी॰
त्वधीःजगन्मिथ्यात्वज्ञानंभवतीत्यर्थः॥७९॥ ॥ ४०

यत्रत्वस्यसर्वमात्मैवाभूत्तत्केनकंपश्येदित्याश्रुतिर्दृष्टदर्शनादिदृश्यानांवबोधयत्यतोविद्योत्पद्यमानाजग
द्विलापयेदेव॥ एवंसतिविदुषांभोगःकथंस्यादित्याशंक्यप्रवृत्तभेनेनत्वांकतेभोकन येन॥ यत्रत्वस्येति यत्र
यस्यांविद्यावस्थायांकृत्स्नंजगदस्यविदुषःस्वात्मैवाभूदिदंसर्वंयदयमात्मेतिज्ञानेनस्वरूपमेवभव

यत्रत्वस्यजगत्स्वात्मापश्येत्कस्तत्रकेनकिं॥ किंजिघ्रेत्किंवदेद्वेतिश्रुतौतुप्रकटीरितं॥८०॥

ति॥ तत्रतस्यांदशायांकोद्रष्टाकेनसाधनेनचक्षुषाकिंदृश्यंरूपजातंपश्येदेवंघ्राणलक्षणेनकिंकुसु
मादिकंजिघ्रेत्किंवाकंकेनवागिंद्रियेणवदेदेवमितरेंद्रियमपाराभावःधीतमायवाचाक्षः॥ इत्येवंप्र
कारेणश्रुतौबाढंप्रकटमुदितमित्यर्थः॥८०॥

ततः किमित्यत आह । तेनेति । स्वाप्ययसंपत्त्योरन्यतरापेक्षमाविष्कृतं हीत्यस्मिन्सूत्रे येयं तत्त्वमस्येसुषुप्त्या-
याः श्रुतेः सुप्तिमोक्षयोरन्यतरविषयत्वेन व्याख्यातत्वान्न विद्यया जगदपह्नव इति परिहरति । सुषुप्तीति
॥ ६२ ॥ सुषुप्तीति । स्वाप्ययः सुषुप्तिः संपत्तिर्मुक्तिरित्यर्थः ॥ ६२ ॥ अस्याः श्रुतेः सुप्त्यादिविषयत्वानङ्गीकारे बा-

तेन द्वैतमपह्नुत्य विद्योदेति न चान्यथा । तथा च विदुषो भोगः कथं स्यादिति चेच्छृणु ॥ ६२ ॥ सु-
षुप्तिविषया मुक्तिविषया वा श्रुतिस्त्विति । उक्तं स्वाप्ययसंपत्त्योरिति सूत्रे ह्यतिस्फुटम् ॥ ६३ ॥ अ-
न्यथा याज्ञवल्क्यादेराचार्यत्वं न संभवेत् । द्वैतदृष्टावविद्वत्ता द्वैतादृष्टौ न वाग्वदेत् ॥ ६४ ॥ ॥

धकमाह । अन्यथेति । तत्रोपपत्तिमाह । द्वैतदृष्टाविति । याज्ञवल्क्यादिर्यदि द्वैतं पश्येत्तदा द्वैतज्ञाना-
नावान्नाचार्यो न विदेय द्वैतं न पश्यति । तर्हि बोध्यशिष्याद्यनुपलम्भादाचार्यवाक्यशिष्यं प्रतिबोधनाय न
प्रवर्तेत । ततो विद्यासंप्रदायोच्छेदप्रसंग इति भावः ॥ ६३ ॥ ॥ ४१

ननु याज्ञवल्क्यादीनामाचार्यत्वदशायां विद्यमानस्य ज्ञानस्य विद्यात्वमस्त्येव । तथापि तस्य नापरोक्षविद्या-
त्वं द्वैतप्रतीतिसद्भावात् निर्विकल्पसमाधौ तु द्वैतदर्शनाभावात्सैवापरोक्षविद्येति शंकते । निर्विकल्पेति ।
द्वैताप्रतीतेरतिप्रसंगापादकत्वान्नैवमिति परिहरति । सुषुप्तिरिति ॥ ६४ ॥ अतिप्रसंगपरिहारं शंकते ।
आत्मतत्त्वमिति । सुप्तो द्वैतदर्शनाभावेप्यात्मगोचरज्ञानाभावान्न विद्यात्वं तस्येत्यर्थः । तर्ह्यात्मवि-

निर्विकल्पसमाधौ तु द्वैतादर्शनहेतुतः । सैवापरोक्षविद्येति चेत्सुषुप्तिस्तथा न किम् ॥ ६४ ॥ आ-
त्मतत्त्वं न जानाति सुप्तो यदि तदा त्वया । आत्मधीरेव विद्येति वाच्यं न द्वैतविस्मृतिः ॥ ६५ ॥ उभयं
मिलितं विद्या यदि तर्हि घटादयः । अर्धविद्याभाजिनः स्युः सकलद्वैतविस्मृतेः ॥ ६६ ॥

वेकेन ज्ञानस्यैव विद्यात्वं न द्वैतदर्शनाभावस्येत्याह । तदा त्वयेति ॥ ६५ ॥ ननु द्वैतादर्शनात्मज्ञानयो-
रुभयोर्मिलितयोरेव विद्यात्वं नैकैकस्येति शंकते । उभयमिति । द्वैतविस्मृतेरपि विद्यांशत्वाङ्गीकारे
जडस्यार्धविद्यावत्त्वप्रसंग इति परिहरति । तर्हीति । अत्रोपपत्तिमाह । सकलेति ॥ ६६ ॥ ॥

अस्मिन्नेव पूर्वोक्ते समाधिमतां पुरुषाणां मध्ये विद्यावत्त्वमपि न स्यादिति सोपहासमाह । महाकेति । घटा
दीनां यथा द्वैतविस्मरणं दृढं तथा तव समाधौ द्वैतविस्मरणं न संभवति महाकष्टसाध्यानामनेकेषां
विक्षेपाणां सत्त्वादित्यर्थः ॥ ८७ ॥ न त्वात्मज्ञानस्यैव विद्यात्वं न द्वैतविस्मृतेरिति शंकते । आत्मधी

महाकष्टनिरुद्धानां विक्षेपाणां बकुलत्वतः । तव विद्या तथा न स्यात् घटादीनां यथा दृढा ॥ ८७ ॥
आत्मधीरेव विद्येति यदि तर्हि सुखी भव । दुष्टचित्तं निरुंध्यस्व निरुंधि त्वं यथासुखं ॥ ८८ ॥

रिति । तदस्माकमिष्टमित्यभिप्रायेण नवीनवेदांती वदति । तर्हीति । न त्वात्मधीरेव विद्या ज्ञानं दुष्टचित्तस्य सं
नवस्तत्र तद्दोषपरिहाराय चित्तवृत्तिनिरोधः कार्य इति शंकामनुभाषते । दुष्टचित्तमिति । तदंगी
करोति । निरुंधीति । अस्माकमपीति शेषः ॥ ८८ ॥ ॥

तदिष्टमिति । अस्माकमपीति शेषः । कुत इत्यत आह । एष्टव्येति । चित्ते दोषापगमे सत्यपि तीयात्मज्ञानाये
ष्यमाणं । जगन्मायामयत्वं सम्यगीक्ष्यते यतोऽतः इष्टमित्यर्थः । एवं किमिच्छन्निति मंत्रांशेनाभिप्रेतमर्थ
मुपपादितमुपसंहरति । इच्छन्निति । इच्छन्नप्ययं अज्ञवत् नेच्छेत् अतः किमिच्छन्निति कृतमिति योजना ॥
८९ एवमभिप्रायवर्णने कारणमाह । रागो लिंगमिति । रागो लिंगमबोधस्य चित्तमायामन्त्रमिसुपकृ

तदिष्टमेष्टमायामयत्वस्य समीक्षणात् । इच्छन्नप्यज्ञवन्नेच्छेत्किमिच्छन्निति दिक्कृतं ॥ ८९ ॥
रागो लिंगमबोधस्य संतु रागादयो बुधे । इति शास्त्रद्वयं साध्यमेवं सत्यविरोधितः ॥ ९० ॥

तः शाङ्कलतात्स्य समीक्षणात् यस्माच्छिः कोटरेतरो रिति तत्त्वविदो रागनिषेधपरं शास्त्रं । रागस्त्वार्यस्य
समाप्तता मुक्तिस्यान्नावतामिति: । रागादयः संतु कामं तत्तज्ज्ञा वोऽपराध्यत इति । तस्यैव रागांगीका
रपरं च शास्त्रं । एवं च सति तत्त्वविदो दृढरागाभावे सति शास्त्रद्वयं सार्थमर्थवद्भवति । अविरोध
तः रागनिषेधपरस्य शास्त्रस्य दृढरागविषयत्वात् तदनुपगमपरस्य शास्त्रस्य रागाभासविषयत्वादिति

राद्यं किमिच्छन्नित्यंशस्याभिप्रायमुपवर्ण्य कस्य कामायेत्यंशस्याभिप्रायमाह । जगदिति । यथा ज

जगन्मिथ्यात्ववत्स्वात्माऽसंगत्वस्य समीक्षणात् । कस्य कामायेति वचो भोक्त्रभावविवक्षया क
॥९१॥

गन्मिथ्यात्वबोधेन वास्तवकाम्याभावविवक्षया किमिच्छन्नित्युक्तमेवमात्मनोऽसंगत्वबोधेन वास्तव बृ·दी·
भोक्त्रभावविवक्षया कस्य कामायेति [blot]स्याभिप्रायमित्यर्थः ॥९१॥ ॥ ४३

नन्वात्मनो भोक्तृत्वप्रतिषेधस्तत्वमसक्तिपूर्वको वक्तव्यः सा नानुविद्यते ऽसंगत्वादात्मनस्त्वाचांकरः तस्मा:
स्वानुत्तवसिद्धत्वान्मैवमित्यभिप्रेत्य तदनुवादिकां श्रुतिमर्थतोऽनुक्रामति । पतिजायादिकमिति । नवा
अरे पत्युः कामाय पतिः प्रियो भवतीत्यारभ्यात्मनस्तु कामाय सर्वं प्रियं भवतीत्यंतेन वाक्यसंदर्भेण

पतिजायादिकं सर्वं तत्तद्भोगाय नेच्छति । किंत्वात्मभोगार्थमिति श्रुतावुद्घोषितं बहु ॥९२
किं कूटस्थश्चिदाभासोऽथवा किं वोभयात्मकः । भोक्ता तत्र न कूटस्थोऽसंगत्वाद्भोक्तृतां व्रजे
त् ॥९३॥

पतिजायादिकस्य प्रपंचस्यात्मनो भोगसाधनत्वं प्रतिपादयंत्यात्मनो भोक्तृत्वप्रसक्तिरित्यर्थः ॥९२॥ ए
वमात्मनो भोक्तृत्वप्रसक्तिं प्रदर्श्य तदपवादाय भोक्तारं विकल्पयति । किं कूटस्थ इति । किं कूटस्थस्य भोक्तृ
त्वमुत चिदाभासस्याथवा किं वोभयात्मकस्येति विकल्पार्थः । तत्राद्यं प्रत्याह । तत्र न कूटस्थ इति
॥९२॥

असंगत्वमस्य भोक्तृत्वमप्यस्तु को दोष इत्याशंक्याह । सुखदुःखेति । सुखदुःखाभिमानात्मके
णो विकारो भोगः सोऽसंगकूटस्थस्य न युज्यते । कूटस्थत्वविकारित्वयोरेकत्र समावेशायोगादित्यर्थ
ः ॥ ५४ ॥ ननु तर्हि विकारिणश्चिदाभासस्य भोक्तृत्वं स्यादित्याशंक्य । विकारित्वेऽपि निरधिष्ठानस्य तस्यैवा

सुखदुःखाभिमानाख्यो विकारो भोग उच्यते । कूटस्थश्चाविकारी चेत्तेन भुक्तमिदं कथं ॥ ५४ ॥
विकारिबुद्ध्यधीनत्वादाभासे विकृतावपि । निरधिष्ठानविभ्रान्तिः केवला न हि तिष्ठति ॥ ५५ ॥

ऽसिद्धमेवमिति परिहरति । विकारीति । चिदाभासस्य विकारिबुद्ध्युपाध्यधीनतात्तस्मिन्विकारे
संभवत्यपि । तस्यारोपितस्यारोपितस्य स्वरूपतेनाधिष्ठानभूतं कूटस्थं विहाय स्वातंत्र्येणाव
स्थानासंभवात्केवलं चिदाभासस्यापि भोक्तृत्वं न संभवतीति भावः ॥ ५५ ॥ ॥ ४४

स

तस्मात्तृतीयः पक्षः परिशिष्यत इत्याह । उभयात्मक इति । यतः केवलस्य भोक्तृत्वं न संभवत्यत उभयात्मकः
साधिष्ठानश्चिदाभास एव लोके व्यवहारदशायां भोक्तेति निधीयते । परमार्थवस्तु उभयात्मकत्वमेव न घट
त इति भावः । नन्वसंगो ह्ययं पुरुष इत्यादावसंगत्वस्यैव योऽयं विज्ञानमयः प्राणेष्वित्यादौ बुद्ध्यादितादात्म्य
स्यापि श्रवणादुभयात्मकं भोक्तृस्वरूपमपि पारमार्थिकमेव स्यान्न लोकव्यवहारमात्रसिद्धमित्या

उभयात्मक एवातो लोके भोक्ता निगद्यते । तादृगात्मानमारभ्य कूटस्थः शेषितः श्रुतौ ॥ ५६ ॥

शंक्य श्रुतेस्तत्र तात्पर्याभावान्नैवमित्याह । तादृगात्मानमिति । तादृगात्मानं बुद्ध्युपाधिकं भोक्तार
मात्मानमारभ्यानूद्य कूटस्थः बुद्ध्यादिकल्पनाधिष्ठानभूतश्चिदात्मा शेषितः । बुद्ध्याद्यनात्मनिरसने
न परिशेषितः श्रुतौ बृहदारण्यकादावित्यर्थः ॥ ५६ ॥ ॥

तत्र बृहदारण्यकवाक्यार्थं तावत्संक्षिप्य दर्शयति । आत्मेति । जनकेन कतमः आत्मेत्येवमात्मनि पृष्टे सति याज्ञवल्क्यस्तं विबोधयन् योयं विज्ञानमयः प्राणेष्वित्यादिना विज्ञानमयमुपक्रम्यासंगो ह्ययं पुरुष इत्यसंगं कूटस्थं परिशेषितवानित्यर्थः ॥१९७॥ एवं बृहदारण्यके ऽसंगात्मपरिशेषण-प्रकारं प्रदर्श्य ऐतरेयादिश्रुत्यंतरेष्वपि दर्शयति । कोयमिति । कोयमात्मेति वयमुपास्महे

आत्मा कतम इत्युक्ते याज्ञवल्क्यो विबोधयन् । विज्ञानमयमारभ्यासंगं तं परिशेषयत् ॥१९७॥ कोयमात्मेत्येवमादौ सर्वत्रात्मविचारतः । उभयात्मकमारभ्य कूटस्थः शिष्यतेंततः ॥१९८॥

कतमः आत्मेत्येवमादावात्मविचारेणांतःकरणोपाधिकमात्मानमारभ्य प्रज्ञानमात्रात्मकः कूटस्थः परिशेषितः । एवमन्यत्रापि द्रष्टव्यं । एवं युक्तिश्रुतिपर्यालोचनया उभयात्मकस्य भोक्तुर्मिथ्यात्वं पारमार्थिकस्यासंगस्य कूटस्थस्याभोक्तृत्वं सिद्धं ॥१९८॥ ॥

ननु कर्तुर्भोक्तुर्मिथ्यात्वे प्राणिनां तस्मिन्सत्यत्वबुद्धिः कुतो जायत इत्याशंक्याह । कूटस्थेति । आत्मा लोकप्रसिद्धो भोक्ता अविवेकतः स्वस्य कूटस्थादविवेकाज्ज्ञानाभावेन कूटस्थनिष्ठं सत्यत्वमात्मन्यध्यस्य तद्द्वारा स्वनिष्ठस्य भोक्तृत्वस्यापि सत्यतां मत्वा भोगं कदाचिदपि न हातुमिच्छति ॥१९९॥ ननु तर्ह्यात्मनस्तु कामाय सर्वं प्रियं भवतीत्यात्मशेषत्वं भोग्यस्य कथं प्रतिपाद्यत इत्याशंक्य न कूटस्थात्म

कूटस्थसत्यतां स्वस्मिन्नध्यस्यात्माऽविवेकतः । तात्त्विकीं भोक्तृतां मत्वा न कदाचिज्जिहासति ॥१९९॥ भोक्ता स्वस्यैव भोगाय पतिजायादिमिच्छति । एष लौकिकवृत्तांतः श्रुत्या सम्यगनूदितः ॥

शेषत्वं प्रतिपाद्यते किंतु लोकप्रसिद्धोभयात्मकभोक्तृत्वशेषत्वमेव श्रुत्याऽनूद्यत इत्याह । भोक्तेति । लोके यो भोक्ता स स्वस्यैव भोगाय पतिजायादि भोगोपकरणमिच्छतीत्ययं लौकिकवृत्तांतः श्रुत्या सम्यगनूदितो नाऽपूर्वतया प्रतिपाद्यत इत्यर्थः ॥२००॥ ॥

अनुवादः किमर्थमित्याशंक्य ॥ लोकार्थं वृद्धेभ्यो विधानायेत्याह ॥ लोभ्यानामिति ॥ लोभ्यादीनां पतिजायादीनां लोकः स्वस्य भोगोपकरणत्वाल्लोभ्येष्वनुरागेण कर्तव्यः ॥ किंतु ॥ प्रधानत्वेन लोकायैवानुरागः कर्तव्य इति विधानायेत्यर्थः ॥ २०१ ॥ लोभ्येषु प्रेमत्यागपुरःसरमात्मप्रेमकर्तव्यतायां दृष्टांतत्वेन भूरिप्रेमप्रार्थनापुरःसरं पुराणवचनमुदाहरति ॥ याप्रीतिरिति ॥ अविवेकिनामात्मज्ञानशून्यानां विषयेषु तया

लोभ्यानां चोत्कृष्टत्वात्मा लोभ्येष्वनुरज्यतां ॥ लोकार्थं वै प्रधानेऽतोऽनुरागं तं विधित्सति ॥ २०१ ॥
याप्रीतिरविवेकीनां विषयेष्वनपायिनी ॥ त्वामनुस्मरतः सा मे हृदयान्मापसर्पतु ॥ २०२ ॥ ॥

यिनी दृढा या प्रीतिरस्ति हे मापते लक्ष्मीपते ॥ सा प्रीतिस्त्वामनुस्मरतस्त्वां सदा चिंतयतो मे हृदयान्मनसः सर्पतु मापगच्छतु मम मनो विषयेषु या सक्तिं परित्यज्य त्वय्येव सदा तिष्ठत्वित्यर्थः ॥ यथा अविवेकीनां विषयेषु दृढा या यादृशी प्रीतिरस्ति सा तादृशी विषयेषु विद्यमाना प्रीतिस्त्वामनुस्मरतो मे हृदयान्मापसर्पतु मापगच्छतु सदा तिष्ठत्वित्यर्थः ॥ २०२ ॥ ॥ ४६

ननु त्वेवं पुराणोक्तौ किमायातं तत्राह ॥ इतिन्यायेनेति ॥ इत्यनेन पुराणोक्तन्यायेन सर्वस्माल्लोभ्यजातात्पतिजायादिलक्षणाद्विरक्तधीः विरक्ता धीर्यस्य स विरक्तधीः पुरुषस्तां लोभ्यगोचरां प्रीतिं लोकार्थात्मन्युपसंहृत्य एवमात्मानं वस्तु सते वोढुमिच्छति ॥ २०३ ॥ एवमात्मन्येव प्रेमोपसंहारे फलितं सदृष्टांतमाह

इतिन्यायेन सर्वस्माल्लोभ्यजाताद्विरक्तधीः ॥ उपसंहृत्य तां प्रीतिं लोकार्थं वै बुभुत्सते ॥ २०३ ॥ स्रक्
चंदनवधूवस्त्रसुवर्णादिषु पामरः ॥ अप्रमत्तो यथा तद्वन्न प्रमाद्येल्लोकरि ॥ २०४ ॥ ॥ ति

स्रक्चंदनेति ॥ पामरः पृथग्जनः स्रगादिविषयेषु यथाऽप्रमत्तः सावधानो भवति ॥ एवं मुमुक्षुरप्यात्मनि विषये न प्रमाद्यदनवधानं न करोति ॥ किंतु तच्चिंतयैव तिष्ठतीत्यर्थः ॥ २०४ ॥ ॥

स्यानवधानाभावमेवबकुमिदृष्टांतेःस्पष्टयति।कामेति।यथाविजिगीषुःशत्रुविजयकामइह्योक
प्रधानःपुरुषोनिरंतरंकामादीनभ्यस्यतिएवंमुमुक्षुरपिसदास्वात्मानंविचारयेत्॥२०५॥जपेति॥यथावै
दिकःस्वर्गार्थीतत्साधनानिजपादीनिश्रद्धापुरःसरमनुतिष्ठतितथामुमुक्षुर्मोक्षेच्छयास्वश्रौतेश्चात्म

कामनाटकतर्कादीनभ्यस्यतिनिरंतरं।विजिगीषुर्यथातद्वन्मुमुक्षुःस्वंविचारयेत्॥२०५॥ज
पयागोपासनादिकुरुतेश्रद्धयायथा।स्वर्गादिवांछयातद्वद्बुध्यात्तत्त्वंमुमुक्षया॥२०६॥चित्तै
काग्र्यंयथायोगीमहायासेनसाधयेत्॥अणिमादिप्रेप्सयैवंविविच्यात्सन्मुमुक्षया॥२०७॥

निर्विघ्नासंक्रयेत्॥२०६॥चित्तैकाग्र्यमिति॥योगियोगाभ्यासवानणिमाद्यैश्वर्यलाभेच्छयामहायासेनचि
त्तैकाग्र्यंयथासंपादयेत्तद्वद्यमाप्यात्मानंसदाविविच्यात्देहादिभ्योविविक्तंजानीयादित्यर्थः॥२ हं०दी०
॥२०७॥ ॥ ४७

नन्वेवमेतेषांसदाभ्यासेनकिंफलमित्यतआह।कौशलमिति॥यथातेषांकामादीनामभ्यासवतामभ्यासपाटवेन
तस्मिंस्तस्मिन्विषयेकौशलानिविवर्धंते।एतमस्यापिमुमुक्षोरभ्यासाद्विवेकोदेहादिभ्यआत्मनोभेदज्ञा
नंविशदायतेस्पष्टंभवति॥२०८॥विवेकवैशद्यस्यफलमाह॥विविंचतेति॥अन्वयव्यतिरेकाभ्यांनोक्त

कौशलानिविवर्धंतेतेषामभ्यासपाटवात्।यथातद्वद्विवेकोस्याप्यभ्यासाद्विशदायते॥२०८॥
विविंचतानोकृतत्त्वंजाग्रदादिषुसंगता।अन्वयव्यतिरेकाभ्यांसाक्षिण्येवविलीयते॥२०९॥

तत्त्वंनोकुःपारमार्थिकंस्वरूपंविविंचतानोस्मेजडजातेमोजेदेनुजानतापुरुषेणजाग्रदादिषुजाग्रत्स्व
सुषुप्तिषुयस्यासुसाक्षिण्येःसंगतात्वविलीयतेनिश्चीयतइत्यर्थः॥२०९॥ ॥

स्त्वव्यतिरेको दर्शयति॥ यच्चेत्यादिति॥ जाग्रदादिषु मध्ये यत्र यस्मिन्स्थाने जाग्रति स्वप्ने सुषुप्तौ वा यत्स्थू
लसूक्ष्मानंदरूपेति त्रिविधं भोग्यं दृष्टं साक्षिणा तद्रूपतः तद्रूप्यते तद्रूपं तत्रैव तस्यामेवावस्थायां तिष्ठति ना
इतरत्र तदितरस्यामवस्थायां नास्ति॥ दृष्टं तु सर्वत्रानुगततया वर्तत इत्यनुभवः सर्वसंमत इति प्रसिद्धमेत
दित्यर्थः॥२०॥ न केवलमनुभवः किंत्वागमोपीत्यभिप्रायेण स यत्तत्र किंचित्पश्यत्यनन्वागतस्तेन भवत्य

यच्च यद्रूपतो दृष्टं जाग्रत्स्वप्नसुषुप्तिषु॥ तत्रैव तन्नेतरत्रेत्युक्तं श्रुतिभिरिमं मतम्॥२१॥ स यत्तत्रेक्षते
किंचित्तेनानन्वागतो भवेत् दृष्ट्वैव पुण्यं पापं चेत्यसक्तं श्रुतिषु डिंडिमः २२

संगीयते पुरुषः स वा एतस्मिन्संप्रसादे रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः प्रतिन्यायं प्रतियोन्याद्रव
तीस्वप्नायैवेत्यादिवाक्यसमर्थितिः पठति॥ स यत्तत्रेति॥ स आत्मा तत्र तस्यामवस्थायां यत्किंचिद्भोग्यमीक्षते पश्यति तेन भो
ग्यरूपेणानन्वागतो न वेदननुगतो न भवेत्किंतु स्वयमेवावस्थांतरं गच्छतीत्यर्थः॥ पुण्यं पुण्यफलं सुखं
पापं तत्फलं दुःखं च दृष्ट्वैवानादायेत्यर्थः॥२२॥

कै·दी·
४८

नोक्ततत्त्वविवेचनपराणि श्लोकांतराणि दर्शयति॥ जाग्रदिति॥ यत्सत्यज्ञानानंदलक्षणं ब्रह्म स्वाभिन्नरूपेणाव
स्थितं जाग्रदादिप्रपंचं प्रकाशते प्रकाशयति तद्ब्रह्माहमस्मि न भिन्नमिति विद्वान्सामाधिप्रहमस्मीति ज्ञात्वा श्रु
त्यनुभवाभ्यां निदिध्यास्य सर्वप्रतिबंधैः प्रमातृत्वकर्तृत्वादिभिः प्रमुच्यते प्रकर्षेण सर्वात्मना मुच्यते॥ जाग्र

जाग्रत्स्वप्नसुषुप्त्यादिप्रपंचं यत्प्रकाशते॥ तद्ब्रह्माहमिति ज्ञात्वा सर्वबंधैः प्रमुच्यते॥२२॥ एक
एवात्मा मंतव्यो जाग्रत्स्वप्नसुषुप्तिषु॥ स्थानत्रयव्यतीतस्य पुनर्जन्म न विद्यते॥२३॥

दादिष्ववस्थास्वेक एवात्मा मंतव्यः॥२२॥ एकेति॥ एवं विवेकक्रमेण स्थानत्रयव्यतीतस्य अवस्थात्रया
द्विविक्तस्यात्मनः पुनर्जन्म न विद्यते एतच्छरीरपातानंतरं शरीरांतरप्राप्तिर्नास्तीत्यर्थः॥२३॥

त्रिष्विति॥ त्रिषुधामसुत्रिषुस्थानेषुयद्भोग्यंस्थूलप्रविविक्तानंदरूपंयश्चभोक्ताविश्वतैजसप्राज्ञ
रूपोयश्चभोगस्तदनुभवरूपश्चेतिःयेत्रयस्तेभ्यःस्थानादिभ्योविलक्षणोयश्चिन्मात्ररूपःसाक्षीसदा
शिवःनिरतिशयानंदरूपत्वेनसर्वदाशोभमानःपरमात्माऽस्तिसोहमस्मीत्यर्थः॥२४॥एवंविवे

त्रिषुधामसुयद्भोग्यंभोक्ताभोगश्चयद्भवेत्॥तेभ्योविलक्षणःसाक्षीचिन्मात्रोहंसदाशिवः॥
२४॥एवंविवेचितेतत्त्वेविज्ञानमयशब्दितः॥चिदाभासोविकारीयोभोक्तृत्वंतस्यशिष्यते॥२५॥

केनात्मतत्त्वेऽसंगेनिश्चितेसतिभोक्तृत्वंकस्येत्यतआह॥एवंविवेचितेइति॥योविज्ञानमयशब्देनाभि तृ॰दी॰
धीयमानश्चिदाभासस्तस्यविकारिताभोक्तृत्वमित्यर्थः॥२५॥ ४८

ननुचिदाभासस्यभोक्तृत्वांगीकारेकस्यकामायेत्यत्रोक्तभोक्तृत्वविवक्षयेतिपूर्वोक्तंकिंत्वाहन्येतेस्मात्रांकुरतस्य
स्वचनस्यपारमार्थिकभोक्तृत्वाभावपरत्वमभिप्रेत्यभोक्तुश्चिदाभासस्यमिथ्यात्वंसाधयति॥मायिकोयमि
ति॥अयंचिदाभासोमायिकोमृषात्मकःश्रुतेः॥जीवेशावाभासेनकरोतीतिश्रुतेः॥अनुभवादपिद्रष्टृ

मायिकोयंचिदाभासःश्रुतेरनुभवादपि॥इंद्रजालंजगत्प्रोक्तंतदंतःपात्ययंयतः॥२६॥

दित्रितयमध्यवर्तित्वेनानुभूयमानत्वादपीत्यर्थः॥तदेवोपपादयति॥इंद्रजालमिति॥इंद्रजालवन्मि
थ्याभूतेजगत्यंतर्भूतत्वादस्यापिमिथ्यात्वंतद्वदनुभूयतेविद्वद्भिरितिशेषःयस्माज्जगदंतःपातीसतो
मृषेतियोजना॥२६॥

अस्य जगतः स्वविनाशित्वानुभवादपि मृषात्वमित्याह ॥ विलयोपीति ॥ मूर्च्छादिरादिशब्दार्थः ॥ ननु मृषात्वं ततः किमित्यत आह ॥ एतादृशमिति ॥ यदा कूटस्थाद्विवेचितश्चिदाभासो मायिको ज्ञातः तदा स्वस्य स्वभावं स्वतत्वमेतादृशं मृषात्मकं पुनः पुनर्विविनक्ति कूटस्थाद्विविच्य जानाति ॥१६॥ ततोपि किमित्यत आह ॥

विलयोप्यस्य सुप्त्यादौ साक्षिणा ह्यनुभूयते ॥ एतादृशं स्वस्वभावं विविनक्ति पुनः पुनः ॥१७॥
विच्छिन्नाशं निश्चित्य पुनर्भोगं न वाञ्छति ॥ मुमुर्षुः शायितो भूमौ विवाहं को नु वाञ्छति ॥१८॥
जिह्रेति व्यवहर्तुं च भोक्ताहमिति पूर्ववत् ॥ छिन्ननास इव क्लीतः क्लिश्यन्नारब्धमश्नुते ॥१९॥

विच्छिन्नेति ॥ स्वविनाशं निश्चित्य भोगेच्छां न वहति दृष्टान्तमाह ॥ मुमुर्षुरिति ॥१८॥ किंच पूर्ववदहं भोक्तेति व्यवहर्तुमपि लज्जत इत्याह ॥ जिह्रेतीति ॥ तर्हि ज्ञानोत्पत्त्यनन्तरं प्रारब्धावसानपर्यन्तं कथं व्यवहरतीत्यत आह ॥ छिन्ननास इति ॥ क्लीतो लज्जितः क्लिश्यन्नेदानीमपि कर्म द्वीयत इति क्लेशमनुभवन्प्रारब्धमश्नुते प्रारब्धकर्मफलं भुङ्क्ते इत्यर्थः ॥१९॥ ५०

इदानीं ज्ञानानन्तरं साक्षिणो भोक्तृत्वाभावः कैमुतिकन्यायसिद्ध इत्याह ॥ यदा स्वस्येति ॥ स्वयं चिदाभासः स्वस्यापि भोक्तृत्वं मन्तुमहं भोक्तेति ज्ञातुं जिह्रेति विलज्जते ॥ यदा तदा एतत्स्वगतं भोक्तृत्वं साक्षिण्यपसङ्गे आरोपयेदिति वृथा कथायाश्शून्या कैव न कार्येत्यर्थः ॥२०॥ उक्तमर्थं दृष्टान्तारूढं करोति ॥ इच्छन्निप्रेप्सन्निति ॥ कस्य काम

यदा स्वस्यापि भोक्तृत्वं मन्तुं जिह्रेत्ययं तदा ॥ साक्षिण्यारोपयेदेतदिति केव कथा ह्यया ॥२०॥ इत्य
निप्रेप्सन्भोक्तारमाक्षिप्य विशङ्कया ॥ कस्य कामायेति ततः शरीरानुज्वरो न हि ॥२१॥ स्थूलं सूक्ष्मं
कारणं च शरीरं त्रिविधं स्मृतं ॥ अवश्यं त्रिविधोस्त्येव तत्र तत्रोचितो ज्वरः ॥२२॥

येति श्रुतिरित्यर्थः ॥ कूटस्थस्य चिदाभासस्य वा पारमार्थिकभोक्तृत्वाभावं निप्रेप्सा विशङ्कया शङ्काराहित्येन भोक्तारमाक्षिपति निराकरोति ॥ ननु त्वेवं भोक्त्राक्षेपस्ततः किमित्यत आह ॥ नत इति ॥ न हि ज्वरो ज्वरणं संताप ॥२१॥ तत्त्ववित् शरीरानुज्वराभावं दर्शयितुं शरीरं भेदं तत्र तत्र ज्वरसद्भावं च दर्शयति ॥ स्थूलमिति ॥२२॥

तत्र स्थूलशरीरे ज्वरांस्तावदाह वातपित्तेति ॥२२३॥ सूक्ष्मशरीरे ज्वरान् दर्शयति । कामेति । कामादीनां शां
आदीनां च ज्वरत्वमुपपादयति । द्वयेपीति । द्विविधा अपि क्रमेण आध्यः शास्त्रीया नरं बाधंते । ते ज्वरसाम्या
त् ज्वरा इत्युच्यंत इत्यर्थः ॥२२४॥ कारणशरीरगतो ज्वरस्तां दोगकृतावुक्त इत्याह । स्वं पश्यंचेति । नाहं खल्वऽ

वातपित्तश्लेष्मजन्या व्याधयः कोटिशस्तनौ । दुर्गंधित्वकुरूपत्वदाहभंगादयस्तथा ॥२२३॥ काम
क्रोधादयः शांतिदांसाद्या लिंगदेहगाः । ज्वरा द्वयेपि बाधंते प्राप्ता प्राप्तानरं क्रमात् ॥२२४॥ स्वं प
रं च न वेत्त्यात्मा विनष्ट इव कारणे । आगामिदुःखबीजं चेत्येतदिंद्रेण दर्शितं ।

यमेवं संप्रत्यात्मानं जानातीत्ययमस्मीति नो एवेमानि भूतानि विनाशमेवापीतो भवति नाहमत्र भोग्यं पश्यामी
ति वाक्येन स्वपरज्ञानशून्यत्वमुक्तं । नष्टप्रायत्वं परोक्षं रागामिदुःखबीजवासनासद्भावं चेंद्रेण शिष्येन ५१
गुरोः प्रजापतेः पुरतो निवेदितमित्यर्थः ॥२२५॥

एवं त्रिष्वपि देहेषु ज्वरानभिधाय तेषामपरिहार्यत्वमाह एत इति । त्रिष्वपि शरीरेषु प्रतीयमाना एते ज्व
राः शरीरैः सहोत्पन्नत्वेन स्वाभाविकाः संमताः स्वाभाविकत्वं व्यतिरेकमुखेन द्रढयति । वियोगे त्विति
यतः कारणादिनिर्ज्वरैस्तेषां शरीराणां वियोगे तान्निशरीराण्यविनाश एव नैव भवेत् अतः स्वाभाविका
इत्यर्थः ॥२२६॥ तत्र दृष्टांतमाह । तंतोरिति ॥२२७॥ इदानीं कूटस्थे ज्वराभावं कैमुतिकन्यायेन द

एते ज्वराः शरीरेषु त्रिषु स्वाभाविका मताः । वियोगे तु ज्वरैस्तानि शरीराण्येव नासते ॥२२६
ततो वियुज्यते पटो वालेभ्यः कंबलो यथा । मृदो घटस्तथा देहो ज्वरेभ्योपीति दृश्यतां ॥
२२७ चिदाभासे स्वतः कोपि ज्वरो नास्ति यतश्चितः । प्रकाशैकस्वभावत्वमेव दृष्टं न चेतरत्
२२८

र्शयिष्यंश्चिदाभासे तावत् ज्वराभावं दर्शयति । चिदाभास इति । चिदाभासे स्वतः शरीरत्रयगतज्वरस
संबंधमंतरेण न कोपि ज्वरो विद्यते कुत इत्यत आह । यत इति । चितः प्रकाशैकस्वभावस्य विद्यदनु
भवितृत्वात् । तत्प्रतिबिंबस्यापि चिदाभासस्य तथात्वमेष्टव्यमिति भावः ॥२२९॥ ॥

यदर्थं चिदाभासे ज्वरादावनुपपादितस्तदिदानीं दर्शयति । चिदाभासेपीति । यदा चिदाभासेपि ज्व
रः न संभाव्यंते तदा न साक्षिणि संभवंतीति किमु वक्तव्यमिति भावः । ननु तर्हि ज्वरामीत्यनुभवस्य
का गतिरित्यत आह । एवमपीति ॥ २२९ ॥ एकतामेनेशति संक्षेपोक्तमर्थं प्रपंचयति । साक्षिसत्यत्वमि
ति । चिदाभासः स्वेन सहिते शरीरत्रये साक्षिगतं सत्यत्वमध्यस्य तत्सर्वं ज्वरवच्छरीरत्रयं स्वस्वभा

चिदाभासेप्यसंभाव्या जराः साक्षिणि का कथा । एवमप्येकतामेने चिदाभासो ह्यविद्यया ॥
२२९ ॥ साक्षिसत्यत्वमध्यस्य स्वेनोपेते वपुस्त्रये । तत्सर्वं वास्तवं स्वस्य स्वरूपमिति मन्यते ॥
२३० ॥ एतस्मिन्भ्रांतिकालेऽयं शरीरेषु ज्वरस्तथा । स्वयमेव ज्वरामीति मन्यते हि कुटुं
बिवत् ॥ २३१ ॥

स्वस्वरूपमिति मन्यत इत्यर्थः ॥ २३० ॥ एवं भ्रांतिज्ञाने सति किं भवतीत्यत आह ॥
एतस्मिन्निति । अयं चिदाभासोऽस्मिन्भ्रांतिवेलायां शरीरनिष्ठं ज्वरं स्वात्मन्यारोपयतीत्यर्थः । तत्र दृष्टां
ष्टांतमाह । कुटुंबिवदिति ॥ २३१ ॥ त्र॰दि॰ ५२

दृष्टांतं विवादयति । पुत्रेति ॥ २३२ ॥ एवमविवेकदशायां चिदाभासि भ्रांत्या ज्वरं प्रदर्श्य विवेकदशायां तदभा
वं दर्शयति । विविच्येति । चिदाभासः कूटस्थमात्मानं शरीराणि च विविच्य भेदेन ज्ञात्वा । इदं सर्वं मम वास्त
वं रूपमिति मन्यते । इत्युक्तां भ्रांतिं परित्यज्य स्वस्याभासरूपत्वज्ञानेन स्वस्मिन्नध्यादरमकुर्वन्निव स
निजं रूपं जरादिरहितं साक्षिणं सदा चिंतयन्कस्माच्छरीरमनुज्वरेज्ज्वरेदेवच्छरीरमनुसृत्य स्वयं ज्व

पुत्रदारेषु तप्यत्सु तपामीति यथा पुमान् । मन्यते पुरुषस्तद्वदाभासोप्यभिमन्यते ॥ २३२ ॥ विवि
च्य भ्रांतिमुत्सृज्य स्वमप्यगणयन्सदा । चिंतयन्साक्षिणं कस्माच्छरीरमनुसंज्वरेत् ॥ २३३ ॥ अ
यथावस्तुसर्पादिज्ञानं हेतुः पलायने । रज्जुज्ञानेऽहिधीर्ध्वस्ता कृतमप्यनुशोचति ॥ २३४ ॥

कस्मात्संज्वरेन्न संज्वरेदेवेत्यर्थः ॥ २३३ ॥ भ्रांतिज्ञानतत्त्वज्ञानयोर्ज्वरितदभावकारणत्वे दृष्टांतमुदर्श
यति । अयथेति । रज्ज्वादौ कल्पितस्य सर्पादेर्ज्ञानं पलायने कारणं भवति । अधिष्ठानस्या
णौ कल्पितश्चोरो गृह्यते । रज्ज्वादिज्ञानेन सर्पादिबुद्धिर्निवर्तिता तदपि पलायनमनुशोचति । वृथा कृ
कृतमयेत्यनुतथातेत्यर्थः ॥ २३४ ॥ ॥

साक्षिणंसदाचिंतयन्यन्नियुक्तंदृष्टांतेनस्पष्टयति। मिथ्येति यथालोकेऽपिमिथ्यानियोगकर्त्तातद्दोषस्य
प्रायश्चित्तसिद्ध्यर्थंमिथ्यानियुक्तंपुनःपुनःक्षमापयति। एवमयंविद्वान्सोऽपिसाक्षिण्यसंगात्मनिजो
कृताध्यारोपलक्षणमिथ्यानियोगदोषप्रायश्चित्तार्थंसाक्षिणमात्मानंक्षमापयन्निवशरणंगतः॥
१३५॥ तत्रैवदृष्टांतांतरमाह। आहत्येति। यथापापकारिणापुरुषेणहत्त्वापापनुत्त्यर्थमिस्यतत्पापाप

मिथ्यानियोगदोषस्यप्रायश्चित्तत्वसिद्धये। क्षमापयन्निवात्मानंसाक्षिणंशरणंगतः॥१३५॥ ।य
आहत्यपापनुत्त्यर्थंस्नानाद्यावर्त्यतेयथा। आवर्त्तयन्निवध्यानंसदासाक्षिपरायणः॥
१३६॥ ॥

नोदायविहितंस्नानादिकंप्रायश्चित्तमावर्त्यतेपुनःपुनरनुष्ठीयते। तथायमपिचिरंसाक्षिणिसंसा
रित्वारोपणदोषपरिहारायध्यानंपरिवर्त्तयन्निवसदासाक्षिपरायणोभवति॥१३६॥ ॥ ५२

एवंसाक्षिपरत्वंदृष्टांतैरुपवर्ण्यस्वगुणश्रवणेलज्जालुत्वंसदृष्टांतमाह। उपस्थेति॥१३७॥ इदानींशा
रीरत्रयाद्विवेचितस्यविद्वानासस्यपुनस्तैःसहतादात्म्यक्षमानावेदृष्टांतमाह। गृहीतइति॥ नके
वलंस्वापराधनिह्नवयेसाक्ष्यनुसरणंकिंतुमहत्स्वयोजनमित्यर्थमपीति। सिंहावलोकनेनमानसह ये

उपस्थकुष्ठिनीवेश्याविलासेषुविलज्जते। जानतोऽग्रेतथाभासःस्वप्रस्तौविलज्जते
१३७॥ गृहीतोब्राह्मणोम्लेच्छैःप्रायश्चित्तंचरन्पुनः। म्लेच्छैःसंकीर्यतेनैवतथाभासःशरी
रकैः॥१३८॥ यौवराज्येस्थितोराजपुत्रःसाम्राज्यवांछया। राजानुकारीभवतितथासाक्ष्यनुकी
र्ययं॥१३९॥

ष्टांतमाह। यौवराज्यइति। राजानुकारीभवति। राजवत्प्रजारंजनादिगुणवान्भवतीत्यर्थः॥१३९॥ न
नुराययुवराजस्यराजानुसरणेसाम्राज्यंफलंदृश्यतेनैवसाक्ष्यनुसरणेऽत

स्तदनुसरणे कथं प्रवर्त्तत इत्याशंक्याह। यो ब्रह्मेति। स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति नास्या ब्रह्मवित्कुले भवति। तरति शोकं तरति पाप्मानं गुहाग्रंथिभ्यो विमुक्तोऽमृतो भवतीति श्रुतौ ब्रह्मभा वादिरूपस्य फलस्य श्रूयमाणत्वात्तत्फलवांछया सा तदनुसारेण प्रवर्त्तनं युक्तमित्यर्थः ॥२४९॥ ननु ब्रह्म ज्ञानेन ब्रह्मभावप्राप्तौ चिदाभासत्वमेव विनश्येदतः स्वनाशाय कथं प्रवर्त्तत इत्याशंक्याह। देवत्व

यो ब्रह्म स वेद ब्रह्मैव भवत्येष श्रुतिश्रुतिः। श्रुत्वा तदेकचित्तः सन्ब्रह्म वेत्ति न चेतरत्॥२५०॥
देवत्वकामा ह्यग्न्यादौ प्रविशन्ति यथा तथा। साक्षित्वेनावशेषाय स्वविनाशं स वांछति॥२
५१॥

कामार्त्ता यथा लोके देवत्वप्राप्तिकामा मनुष्या नग्न्यग्निप्रयागगंगाप्रवेशादौ प्रवर्त्तंते। एवं साक्षि रूपेणावस्थानलक्षणस्याधिकफलस्य विद्यमानत्वाच्चिदाभासत्वापगमहेतौ ब्रह्मज्ञानेऽपि प्र वृत्तिर्घटत एवेत्यर्थः ॥२५१॥ तृ·दी·
५४

ननु तत्त्वज्ञानेन नाभासत्वमपगच्छति चेत् कथं तत्त्वविदां जीवत्वव्यवहार इत्याशंक्य प्रारब्धकर्मक्षयपर्य ंतं तदुपपत्तिं सदृष्टांतमाह। यावदिति। यथाग्न्यादौ प्रविष्टः पुरुषो दाहादिना स्वदेहनाशपर्यंतं मनु ष्यत्वं नरव्यवहारयोग्यत्वं नैव मुंचति। एवं प्रारब्धकर्मक्षयपर्यंतं चिदाभासत्वव्यवहारो न निवर्त्तते

यावत्स्वदेहदाहं स नरत्वं नैव मुंचति। यावदारब्धदेहः स्यान्नाभासत्वविमोचनं॥२५२॥
रज्जुज्ञानेऽपि कंपादिः शनैरेवोपशाम्यति। पुनर्मंदांधकारे सा रज्जुः क्षिप्तोरगी भवेत्॥२५३॥
एवमारब्धभोगोऽपि शनैः शाम्यति नो हठात्। भोगकाले कदाचित्तु मर्त्योऽहमिति भासते॥
२५४॥

इत्यर्थः ॥२५२॥ ननु नोक्तत्वादिभ्रमोपादानस्याज्ञानस्य निवृत्तत्वात् पुनः कथं भोगानुवृत्तिः कथं वा मर्त्यो ऽहमिति विपरीतप्रतीतिरित्याशंक्य दृष्टांतप्रदर्शनेनैतत्समाधत्ते। रज्जुज्ञानेऽपीति। २५३। दा र्ष्टान्तिके योजयति। एवमिति ॥२५४॥

ननु पुनर्मर्मत्वबुद्धावुदयेतेन तत्त्वज्ञानं बाध्येतेत्याशंक्याह। नैतावतेति। कादाचिदहं मनुष्य इत्येवं विविधज्ञानोदयमात्रेणागमप्रमाणजनिततत्त्वज्ञानं न बाध्यते। कुत इत्यत आह। जीवन्मुक्तीति। इदं मर्त्यत्वबुद्ध्युपाकरणलक्षणं जीवन्मुक्तिव्रतं नियमेनानुष्ठेयं न भवति। किंतु सम्यग्ज्ञानेन भ्रांतिज्ञाननिवृत्तिरित्ययं वस्तुस्वभावः अतः कदाचिन्मर्त्यत्वबुद्ध्युदयेपि पुनस्तत्त्वज्ञानानंतरेणैतस्याएव बा

नैतावतापराधेन तत्त्वज्ञानं विनश्यति। जीवन्मुक्तिव्रतं नेदं किंतु वस्तुस्थितिः खलु॥२४५॥
दशमोपि शिरस्ताडं रुदन्बुध्वा न रोदिति। शिरोव्रणस्तु मासेन शनैः शाम्यति नो तदा॥२४६॥

ध्यत्वमिति भावः॥२४५॥ ननु तु रज्जुसर्पादिस्थलेपि विपरीतज्ञाननिवृत्तावपि तत्कार्यकंपाद्यनुवृत्तिः प्राक् तद्दृष्टांते दशमे दशमस्त्वमसीति वाक्यविचारजन्यज्ञानेन भ्रमनिवृत्तौ तत्कार्यानुवृत्तिर्नोपलभ्यत इत्याशंक्याह दशमोपीति। दशमोऽस्मीतिज्ञानोदये सति शिरस्ताडनपूर्वकं रोदनमात्रं निवर्त्तते ताडनजन्यव्रणस्त्वनुवर्त्तत एवेत्यर्थः॥२४६॥ तृ॰दि॰ ५५

ननु ज्ञानोत्तरकालेपि संसारानुवृत्तौ मुक्तेः कः पुरुषार्थ इत्याशंक्य। मुक्तिलाभजन्यहर्षस्य तद्दुःखाद् कस्य सत्त्वात् पुरुषार्थत्वमिति दृष्टांतपूर्वकमाह दशमेति॥२४७॥ जीवन्मुक्तिव्रतं नेदमित्युक्तं तत्र व्रतत्वाभावे किमायातमित्यत आह व्रताभावादिति। पुनः पुनर्विचारकरणे दृष्टांतमाह रससेवीति यथा रससेवी नरः एकस्मि

दशमामृतिलाभेन जातो हर्षो व्रणव्यथां। तिरोधत्ते मुक्तिलाभस्तथा प्रारब्धदुःखितां॥२४७॥ व्रता
भावाद्यदा बाधा स्तदा भूयो विचिन्त्यतां। रससेवी दिने भुंक्ते भूयो भूयो यथा तथा॥२४८॥ आमय
सौषधेनायं दशमः स्वं व्रणं यथा। भोगेन शमयित्वैतत्प्रारब्धं मुच्यते तथा॥२४९॥

न्दिने त्वबाधापरिहाय पुनः पुनः भुंक्ते तद्वद्भ्यासनिवृत्तये पुनः पुनर्विवेकः क्रियतामित्यर्थः॥२४८॥ निवर्त्यस्य प्रारब्धकर्मफलस्य केन निवृत्तिरित्याशंक्य ताडनजन्यव्रणस्यौषधेनेव भोगेनैवेति निवृत्तिरित्याह आमयेति॥२४९॥

अपरोक्षज्ञानेन शोकनिवृत्तावस्मेतन्नेद्रमोऽवस्थे जीवगेष्वभूत आत्मानं चेद्विति श्रुतिरस्मिन्नेन श्लोकेन आ
त्मानं चेद्विजानीयादयमस्मीति पूरुषः। किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेदित्यस्मिन्मंत्रेऽपरोक्षज्ञा
नशोकनिवृत्तारसंजीवावस्थे केऽप्यभिहितेऽस्मुक्तमिदानीं तदभिधानस्तवितां जीवस्यसप्तमीं दशिलक्षण
मवस्थां हृत्वानुकीर्तनेपूर्वकं वक्तुमारभते। किमिच्छन्नितीति। किमिच्छन्निस्मन्तरार्धेनाभिहितोयः श्लोक

किमिच्छन्निति वाक्योक्तशोकमोहनदीरितः। आनामस्युद्यवस्थेयं षष्ठीरतिस्क सप्तमी॥५०॥

मोहः। स एव तावता ग्रंथसंदर्भेणोदीरितोऽभिहितः एषाज्ञानमावृत्तिस्तत्त्वविक्षेप अपरोक्षधी। अपरो
क्षमतिः शोकमोक्षः स्मृतिर्निरंकुशोत्पत्तेनश्लोकेनाभिहिता मुमसस्तुनी वस्थास्तु षष्ठीसाद। आनासस वृ·टि·
तिा सप्तमीव्याख्यायत इति शेषः॥५०॥ ५६

अपरोक्षज्ञानजन्यायास्तृप्तेर्निरंकुशत्वं प्रतियोगि प्रदर्शनपुरःसरं प्रतिजानीते। सांकुशेति। विषयला
नजन्यायास्तृप्तेर्विषयांतरकामनया कुंठितत्वात्सांकुशत्वमस्यास्तु तदभावान्निरंकुशत्वं तदेव दर्शयति
कृतमिति॥५१॥ कृतकृत्यत्वमेवोपपादयति। ऐहिकेति। अस्य विदुषस्तत्त्वज्ञानोदयात्पूर्वमिहलोके

सांकुशा विषयैस्तृप्तिरियं तृप्तिर्निरंकुशा। कृतंकृत्यं प्रापणीयं प्राप्तमित्येव तृप्यति॥
५१॥ ऐहिकामुष्मिकव्रातसिद्ध्यै मुक्तेश्च सिद्धये। बहुकृत्यं पुरास्यान्तत्सर्वमधुना कृ
तं॥५२॥

इष्टप्राप्तये अनिष्टनिवृत्तये च कृषिवाणिज्यादिकं स्वर्गादिसिद्धये यागोपासनादिकं
मोक्षसाधनज्ञानसिद्धये श्रवणादिकं चेति बहुविधं कर्तव्यमासीदिदानीं तु सांसारिकफलेच्छाभावा
द्ब्रह्मानंदसाक्षात्कारस्य सिद्धत्वाच्च तत्सर्वं कृषियागश्रवणादिकं कृतं कृतप्रायमन्तर्हितः परमनु
ष्ठेयत्वाभावादित्यर्थः॥५२॥

एवं कृतकृत्यत्वमुपपाद्य तत्फलत्वेन तृप्तिं दर्शयति ॥ तदेतदिति ॥ प्रतियोगिपुरःसरं प्रतियोग्यनुसंधा
नपूर्वकं यथा भवति तथा ॥ एवं वक्ष्यमाणप्रकारेण सर्वदा तृप्यति ॥२५३॥ तदेवानुसंधानं प्रपंचयति ॥ दु
ःखिनो ज्ञा इत्यादिना ॥ कृतकृत्यतया तृप्तिः प्राप्तप्राप्यतया पुनः । स्थितः प्राक्कनेयं तथैव ॥ तत्रताव

तदेतत्कृतकृत्यत्वं प्रतियोगिपुरःसरम् । अनुसंदधदेवायमेवं तृप्यति नित्यशः ॥२५३॥ दुःखिनोऽ
ज्ञाः संसरंतु कामं पुत्राद्यपेक्षया । परमानंदपूर्णोऽहं संसरामि किमिच्छया ॥२५४॥ अनुतिष्ठंतु
कर्माणि परलोकयियासवः । सर्वलोकात्मकः कस्मादनुतिष्ठामि किं कथम् ॥२५५॥ व्याचक्षतां
ते शास्त्राणि वेदानध्यापयंतु वा । येऽत्राधिकारिणो मे तु नाधिकारोऽक्रियत्वतः ॥२५६॥

नानुदेहिकसुखा
र्थिनो वेदलक्षणं पंथानं समाश्रयंति ॥ दुःखिन इति ॥२५४॥ स्वर्गादियुक्कर्माद्यनुष्ठानं मे वेदप्रमाणात् अनुतिष्ठंत्विति ॥२५५॥ तृ.दी.
ननु स्वार्थकृत्याभावेऽपि परार्थाः प्रवृत्तिः किंच न स्यादित्याशंक्याधिकाराभावाच्चापि नास्तीत्याह व्याचक्षतामि ७९
ति ॥२५६॥

ननु स्वदेहनिर्वाहार्थं भिक्षाटनादिकं परलोकार्थं स्नानादिकं च त्वया क्रियमाणमुपलभ्यतेऽतोऽकि
यत्वमसिद्धमित्याशंक्य तदपि स्वदृष्ट्या नैवास्ति किं त्वन्यैरेव कल्पितमित्याह निद्राभिक्षे इति ॥२५७॥ अन्य
कल्पनयापि बाधोऽस्तीत्याशंक्य तदभावे दृष्टांतमाह गुंजापुंजादीति ॥२५८॥ ननु फलांतरे कामनाभावे कर्मानु

निद्राभिक्षे स्नानशौचे नेच्छामि न करोमि च । द्रष्टारश्चेत्कल्पयंति किं मे स्यादन्यकल्पनात् ॥२५७॥
गुंजापुंजादि दह्येत नान्यारोपितवह्निना । नान्यारोपितसंसारधर्मानेवमहं भजे ॥२५८॥ शृण्वंतु
त्वज्ञाततत्त्वास्ते जानन्कस्माच्छृणोम्यहम् । मन्यंतां संशयापन्ना न मन्येऽहमसंशयः ॥२५९॥

श्रवणं नाम तत्त्वसाक्षात्काराय श्रवणादिकं कर्तव्यमिमे वेत्याशंक्याज्ञानाद्यभावात् श्रवणादिकर्तव्यमपि ना
स्तीत्याह । शृण्वंत्विति ॥ अज्ञाततत्त्वा अज्ञातं ब्रह्मात्मैकत्वलक्षणं तत्त्वं यैस्ते तथाभूताः श्रवणं कुर्वंतु तत्त्वमि
त्यमन्यथा वेति संशयं कृत्वा मननं कुर्वंतु मम तु तदुभयाभावान्नोभयत्र प्रवृत्तिरित्यर्थः ॥२५९॥

मानूतां श्रवणमनने विपर्ययनिरासार्थं निदिध्यासनं कर्तव्यमित्याशंक्य देहाद्यात्मबुद्धिलक्षणस्य विपर्ययस्याभावात्तदपि नानुष्ठेयमित्याह। विपर्यस्त इति।१०६। ननु विपर्ययाभावे अहं मनुष्य इति व्यवहारः कथं घटत इत्याशंक्य। वासनावशाद्भवतीत्याह। अहं मनुष्य इति।१०७। तर्ह्यस्य व्यवहारस्य निवृत्तिः कि

विपर्यस्तो निदिध्यासेत्किं ध्यानमविपर्ययात्। देहात्मत्वविपर्यासं न कदाचिद्भजाम्यहं।१०६। अहं मनुष्य इत्यादिव्यवहारो विनाप्यमुं। विपर्यासं चिराभ्यस्तवासनातोऽवकल्पते।१०७। प्रारब्धकर्मणि क्षीणे व्यवहारो निवर्तते। कर्माक्षये त्वसौ नैव शाम्येद्ध्यानसहस्रतः।१०८॥

द्ध्यो ध्यानं संपाद्यमित्याशंक्य। प्रारब्धक्षयमंतरेणास्य निवृत्तिर्नास्तीत्याह। प्रारब्धकर्मणीति।१०८॥ तृ॰दि॰ ५०

ननु प्रारब्धनिमित्तकस्यापि व्यवहारस्य विरलत्वाय ध्यानं कर्तव्यमिति चेत्तत्राशंक्य व्यवहारस्याबाधकत्वादद्धीनात्तन्निवृत्तये ध्यानमननुष्ठेयमित्याह। विरलत्वमिति।१०९। ध्यानस्याकर्तव्यत्वेपि विक्षेपपरिहाराय समाधिः कर्तव्य इत्याशंक्य विक्षेपसमाधानयोर्मनोधर्मत्वान्न विक्षेपनिवारकेपि समाधौ समा

विरलत्वं व्यवहृतेरिष्टं चेद्ध्यानमस्तु ते। अबाधिकां व्यवहृतिं पश्यन्ध्यायाम्यहं कुतः।१०९॥ विक्षेपो नास्ति यस्मान्मे न समाधिस्ततो मम। विक्षेपो वा समाधिर्वा मनसः स्याद्विकारिणः।११०। नित्यानुभवरूपस्य को मेऽत्रानुभवः पृथक्। कृतं कृत्यं प्रापणीयं प्राप्तमित्येव निश्चयः।१११॥

५

धिकर इत्याह। विक्षेप इति।११०। ननु तथापि समाधिफलमनुभवः संपादनीय इत्याशंक्य कृतसमस्तरूपत्वान्न संपाद्यत इत्याह। नित्यानुभवेति। उपपादितं कृतकृत्यत्वं निगमयति। कृतं कृत्यमिति॥ ।१११॥

एवं सर्वत्र कर्तृत्वानभ्युपगमेऽनियतवृत्तित्वं प्रसज्जेतेत्याशंक्य प्रारब्धवशात्स्वास्यानियतवृत्तित्वमं
गीकरोति व्यवहार इति। लौकिको निद्राहारादिः शास्त्रीयो जपसमाध्यादिरन्यथापि वा प्रतिषिद्ध
हिंसादिर्व्यवहारः कर्तृत्वभोक्तृत्वरहितस्य मम प्रारब्धं कर्मानतिक्रम्य प्रवर्त्ततामित्यर्थः॥२६६॥ एवं

व्यवहारो लौकिको वा शास्त्रीयो वाऽन्यथापि वा। ममाकर्तुरलेपस्य यथारब्धं प्रवर्त्ततां॥२६६॥
अथवा कृतकृत्योऽपि लोकानुग्रहकाम्यया। शास्त्रीयेणैव मार्गेण वर्त्तेऽहं मम का क्षतिः॥२६७॥
देवार्चनस्नानशौचभिक्षादौ वर्त्ततां वपुः। तारं जपतु वाक्तद्वत्पठत्वाम्नायमस्तकं॥२६८॥

वस्तुतत्त्वमभिधाय प्रौढवादेनाह। अथवेति। लोकानुग्रहकाम्यया प्राप्तानुग्रहेच्छयेत्यर्थः॥२६७॥ शा
स्त्रीय एव मार्गेऽपि वर्त्तनांगीकारे तर्हि तदभिमानप्रयुक्तो विरः स्यादेवेत्याशंक्याह। देवार्चनेत्यादिना
श्लोकद्वयेन। तारं प्रणवं आम्नायमस्तकं वेदान्तवाक्यं॥२६८॥ द.टी.
५८

२६९॥ फलितमाह एवं चेति॥२७०॥ विभिन्नविषयत्वमेव स्पष्टयति। वपुरिति॥२७१॥ तथा चापि योज्ञानि
कर्मिणोः कलहं कुर्वन्ति तौ विद्वद्भिः परिहसनीयावित्याह। एवं चान्योन्येति॥२७२॥ कुतः परिहास्यत्व

विष्णुं ध्यायतु धीर्यद्वा ब्रह्मानंदे विलीयतां। साक्ष्यहं किंचिदप्यत्र न कुर्वे नापि कारये २६९
एवं च कलहः कुत्र संभवेत्कर्मिणो मम। विभिन्नविषयत्वेन पूर्वापरसमुद्रवत्॥२७०॥ वपु
र्वाग्धीषु निर्बंधः कर्मिणो न तु साक्षिणि। ज्ञानिनः साक्ष्यलेपत्वे निर्बंधो नेतरत्र हि॥२७१॥ ए
वं चान्योन्यवृत्तांतानभिज्ञौ बधिराविव। विवदेतां बुद्धिमंतो हसंत्येव विलोक्य तौ॥२७२॥
यं कर्मी न विजानाति साक्षिणं तस्य तत्त्ववित्। ब्रह्मत्वं बुध्यतां तत्र कर्मिणः किं विहीयते॥
॥२७३॥

मित्याशंक्य निर्विषयकलहकारित्वादित्याह यं कर्मीति वाभ्यां। कर्मी यं साक्षिणं कर्मानुष्ठानोपयोगि
देहवाग्बुद्ध्यतिरिक्तं प्रत्यगात्मानं न विजानाति तत्त्ववित्तस्य ब्रह्मत्वं बुध्यते कर्मिणः कर्मानुष्ठाने किं हीयते
॥२७३॥

देहेति॥ ज्ञानिनामिथ्यात्वबुद्ध्यापरिष्कृतानि देहवाग्बुद्धिभिः कर्मानुष्ठानेषु ज्ञानिनो वा किं हीयते ऽतो निर्वि-
षयकजल्पकारिणोः परिहसनीयत्वमित्यर्थः॥२७४॥ कर्मानुष्ठानं प्रयोजनशून्यतया ज्ञानिनाऽप्युपगम्य
तृप्तिनिवृत्तिं शंकते॥ प्रवृत्तिरिति॥ उपयोगाभावो निवृत्तावपि समान इति परिहरति॥ निवृत्तिरिति॥ निवृत्ते

देहवाग्बुद्धयस्संस्कारा ज्ञानिनोऽनृतबुद्धितः॥ कर्म प्रवर्त्तयन्त्वाभिर्ज्ञानिनो हीयतेऽत्र किं
२७४॥ प्रवृत्तिर्नोपयुक्ता चेन्निवृत्तिः कोपयुज्यते॥ बोधहेतुर्निवृत्तिश्चेद्बुभुत्सा-
यां तथेतरा॥२७५॥

बोधहेतुत्वान्नोपयोगाभाव इति शंकते॥ बोधहेतुरिति॥ तर्हि प्रवृत्तिरपि बुभुत्साहेतुत्वादुपयो- ६०
गवतीत्याह॥ बुभुत्सायामिति॥२७५॥

ननु बुद्धस्य बुभुत्साया अभावात्प्रवृत्तेरनुपयोगित्वमिति पुनः शंकते॥ बुद्धश्चेदिति॥ तर्हि बुद्धस्य पुनर्बुधा-
भावान्हेतुनिवृत्तिरपि बुद्धस्यानुपयोगिनी स्यादित्याह॥ नाप्यसाविति॥ सकृज्ज्ञानस्य बाधस्यास्थिरत्वा-
य निवृत्तिरपेक्ष्यत इत्याशंक्य स्थिरत्वं बाधकज्ञानस्यापेक्षितं तेन साधनान्तरमित्याह॥ अबाधादिति॥ बा-

बुद्धश्चेन्न बुभुत्सेत नाप्यसौ बुध्यते पुनः॥ अबाधादनुवर्त्तेत बोधो न त्वन्यसाधनात्॥२७६॥ नाविद्या न
नापि तत्कार्यं बोधं बाधितुमर्हति॥ पुरैव तत्त्वबोधेन बाधिते ते उभे यतः॥२७७॥

कप्रमाणजन्यज्ञानस्य बलवता प्रमाणेन बाधाभावादनुवृत्तिः स्यादेव ऽतो न साधनान्तरं तदर्थमनुष्ठेयमित्यर्थः
२७६॥ ननु प्रमाणान्तरेण बाधाभावेऽप्यविद्यया तत्कार्येण कर्त्तृत्वाध्यासेन वा बाधः स्यादेवेत्याशंक्याह॥ ना-
विद्येति॥ तत्र हेतुमाह॥ पुरैवेति॥२७७॥

नन्वविद्याया बाधितत्वेपि तत्कार्यस्य प्रतीयमानस्य बाधितत्वाऽसंभवात्तेन बोधस्य बाधो न वेदित्याशंक्य
मारान्न निवृत्तस्यैव तस्यापि बाधितत्वान्न तेनापि बाधः शक्यः किंतु शक्य इत्याह। बाधितमिति। तत्र दृष्टांतमाह।
जीवन्निति। आखुर्मूषिकः ॥२७०॥ द्वैतदर्शनेन तत्त्वबोधस्य बाधाभावे कैमुतिकन्यायप्रदर्शनेन दृढयितु

बाधितं दृश्यतामक्षैस्तेन बाधो न शक्यते। जीवन्नाखुर्न मार्जारं हंति हन्त कथं मृतः ॥२७०॥
अपि पाशुपतास्त्रेण विद्धश्चेन्न ममार यः। निष्फलेषु विनुन्नांगो नंक्ष्यतीत्यत्र का प्रमा ॥२७१॥

तदेतदुक्तं दृष्टांतमाह। अपीति। यः समर्थः पाशुपतास्त्रेण विद्धोऽपि न ममार स चेत् किं स मनिःफलेषु विनुन्नां
गः फलरहितेषुणा व्यथितदेहः सन्नंक्ष्यतीति नाशं प्राप्स्यतीत्यत्र का प्रमा प्रमाणं नास्तीत्यर्थः ॥२७१॥ तृ.दी. ६१

दृष्टांतसिद्धमर्थं दार्ष्टांतिके योजयति। आदाविति। आदौ विद्याभ्यासमये चित्रैर्वक्रविधैः स्वकार्यैः प्रमा
तुस्तनोः कृत्वकर्तृत्वादिभिर्जृंभमाणया विवर्धमानया अविद्यया बोधो युद्धं युद्धं कृत्वा तामजयत्॥
स एवाऽभ्यासपाटवेन सुदृढोऽद्येदानीमविद्या निर्वीर्या सत्यां निर्मूलिनतत्कार्यं गान्यासेन कथं बाध्या
तां न कथमपि बाध्यतेत्यर्थः ॥२८०॥ उपपादितमर्थं श्लोकेनानुवादरोहयत्र्पकेण दर्शयति। तिष्ठत्विति ॥२८०॥

आदावविद्यया चित्रैः स्वकार्यैर्जृंभमाणया। युद्ध्वा बोधोऽजयत्सोद्य सुदृढो बाध्यतां कथं ॥२८०॥
तिष्ठंत्वज्ञानतत्कार्यशवा बोधेन मारिताः। न भीतिर्बोधसम्राजः कीर्तिः प्रत्युत तस्य तैः ॥
२८१ य एवमतिशूरेण बोधेन न वियुज्यते। प्रवृत्त्या वा निवृत्त्या वा देहादिगतयास्य किं ॥२८२॥

नन्वेवं प्रकृते किमायातमित्यत आह। य एवमिति। यः पुमानेवमुक्तप्रकारेणातिशूरेण विद्यातत्का
र्यघातकेन बोधेन ब्रह्मात्मैकत्वज्ञानेन न वियुज्यते न कदाचिदपि वियोक्तो न भवति अस्य पुंसो देहादि
निष्ठया प्रवृत्त्या वा निवृत्त्या वा किं न किमपीष्टमनिष्टं वेत्यर्थः ॥२८२॥

तर्हिज्ञानिवदज्ञानिनोपिप्रवृत्त्यावाग्रहेणयुक्तःस्यात्तांव्याद्यआहप्रवृत्त्यावेति । तत्रोपपत्तिमाहस्वर्गायवेति ॥८३
विदुषश्चाग्रहेणयुक्तःस्युक्तंतर्हिकर्मिणांमध्येवर्त्तमानेनतेनकिंकर्त्तव्यमित्यतआह विद्वांश्चेदिति । वि

प्रवृत्त्यावाग्रहोमोक्षोबोधहीनस्यसर्वथा ॥ स्वर्गायवाऽपवर्गाययतितव्यंयतोनृभिः ॥८३॥ विद्वां
श्चेन्नाद्यांमध्येतिष्ठेत्तदनुरोधतः ॥ कायेनमनसावाचाकरोत्वेवाखिलाःक्रियाः ॥८४॥

द्वांश्चेन्नाद्यकर्मिणांमध्येतिष्ठेच्चेत्तदनुरोधस्तेषामनुसारेणशारीरादितिः सर्वाःक्रियाःकरोत्वेवनतान्क- वृ॰ टि॰
र्मिणोनिवारयेदित्यर्थः ॥८४॥ ६२

अस्यैवतत्त्वबुभुत्सूनांमध्येऽवस्थितस्यकृत्यमाह । एषइति । एषविद्वान्बुभुत्सूनांमध्येयदातिष्ठेत्तदाएषाबु
भुत्सूनांबोधायतत्त्वज्ञानजननायताःक्रियादूषयन्स्वयमपित्यजतु ॥८५॥ कुतएवंकर्त्तव्यमित्यतआह अवि
द्वानिति अज्ञान्यनुसारेणज्ञानिनोवर्त्तनमुचितंकृपालुत्वात्तेषामनुकंपनीयत्वाच्चेतिभावः । एवंकदृष्ट

एषमध्येबुभुत्सूनांयदातिष्ठेत्तदापुनः ॥ बोधायैषांक्रियाःसर्वादूषयंस्त्यजतुस्वयं ॥८५॥
अविद्वदनुसारेणवृत्तिर्बुद्धस्ययुज्यते ॥ स्तनंधयानुसारेणवर्त्ततेतत्पितायतः ॥८६॥ अधिक्षि
प्तस्ताडितोवाबालेनस्वपितातदा ॥ नक्लिश्नातिनकुप्येच्चबालंप्रत्युतलालयेत् ॥८७॥

मित्यतआहस्तनंधयेति । स्तनंधयाःस्तनपानकर्त्तारःशिशवइत्यर्थः ॥८६॥ पितुस्तनंधयानुसारित्वमेव
दर्शयति । अधिक्षिप्तइति ॥८७॥ ॥

हाष्टांतिके योजयति। निंदित इति। विद्वानज्ञैर्निंदितः स्तूयमानो वा स्वयं न निंदति न स्तौति किं तु तेषामज्ञा-
निनां यथा बोध उपजायते तथाचरेत्॥ २८७॥ एवमाचरणे निमित्तमाह। येनायमिति। अयं ज्ञानी अज्ञानिभिः

निंदितः स्तूयमानो वा विद्वानज्ञैर्न निंदति। न स्तौति किंतु तेषां स्याद्यथा बोधस्तथा चरेत्॥ २८७॥
येनायं नटनेनात्र बुध्यते कार्यमेव तत्। अज्ञप्रबोधान्नैवान्यत्कार्यमस्त्यत्र तद्विदः॥ २८८॥

अज्ञो लोके विदुषो येन यादृशेन नटनेन चरणेन बुध्यते तेन तत्त्वमवगच्छति नदाचरणं। तेन कर्तव्यमेव तदिति तद्वदे-
व कार्यांतरमपि प्रसज्येतेत्यत आह। अज्ञप्रबोधादिति। एतस्य विदुषस्तत्त्वविदः अज्ञलोके अज्ञप्रबोधादन्यत्कर्त- तृ॰दि॰
व्यं नैवास्त्यतस्तदनुसारेण तत्त्वबोधनं कर्तव्यमित्यर्थः॥ २८८॥ ९२

तृप्तत्वं निरूप्यमाणयोऽस्मात्सर्यमाह। कृतकृत्यतयेति। असौ विद्वान्पूर्वोक्तप्रकारेण कृतकृत्यतया कृतं कृत्यं
जातं येनासौ कृतकृत्यस्तस्य भावस्तत्ता तया तृप्तः संतुष्टो निःशेषमाणप्रकारेण प्राप्तप्राप्यतया प्राप्तं प्राप्यं

कृतकृत्यतया तृप्तः प्राप्तप्राप्यतया पुनः। तृप्यन्नेवं स्वमनसा मन्यतेऽसौ निरंतरं॥ २९०॥

येन स प्राप्तप्राप्यस्तस्य भावस्तत्ता तया तृप्यन् तुष्टोऽनेन स्वमनसा निरंतरमेव मन्यते॥ २९०॥

किमन्यत इत्यत आह॥ धन्योहमित्यादिना॥ धन्यः कृतार्थः आदरार्था वीप्सा नित्यमनवरतं स्वात्मानं स्वस्य निजं
रूपं देशाद्यनवच्छिन्नं प्रत्यगात्मानमंजसा साक्षादपरोक्षतो वेद्मि जानामि अतो धन्य इत्यर्थः॥ एवमात्मज्ञानलाभनिमि
त्तां तुष्टिमभिधाय तत्फललाभनिमित्तां तां दर्शयति॥ धन्योहमिति॥ ब्रह्मानंदो ब्रह्मभूतानंदः मे स्पष्टं विना

धन्योहं धन्योहं नित्यं स्वात्मानमंजसा वेद्मि॥ धन्योहं धन्योहं ब्रह्मानंदो विभाति मे स्पष्टं॥२९२॥
धन्योहं धन्योहं दुःखं सांसारिकं न वीक्षेद्य॥ धन्योहं धन्योहं स्वस्याज्ञानं पलायितं क्वापि॥२९३॥

तिरस्कृतं यथा न भवति तथा स्फुरतीत्यर्थः॥२९२॥ एवमिष्टप्राप्त्या तुष्टिमभिधायानिष्टनिवृत्त्यापि तुष्यतीत्याह॥
धन्योहमिति॥ अद्येदानीं दुःखं दुःखरूपसंसारं न वीक्षे न पश्यामि अतः कृतार्थ इत्यर्थः॥ दुःखस्य प्रतीतिका
रणमाह॥ धन्योहमिति अनेनैवाकर्मवासनाजालमज्ञानं क्वापि पलायितं नष्टमित्यर्थः॥२९३॥ तृ॰ दि॰ ६४

अज्ञाननिवृत्तिनिवृत्तफलं कृतकृत्यत्वं प्राप्तप्राप्यत्वं च दर्शयति॥ धन्योऽहमिति॥२९४॥ इदानीं कृतकृत्यत्वमि
त्यादिना जाता या तृप्तिर्निरतिशया तामाह॥ धन्योहमिति॥ अतः परं कृतमादर्शनं तुष्टिरेव परिस्फुरती
ति दर्शयति॥ धन्योहमिति॥२९५॥ अस्य सर्वस्य कारणीभूतपुण्यपुंजपरिपाकमनुस्मृत्य तुष्यतीत्याह॥

धन्योहं धन्योहं कर्त्तव्यं मे न विद्यते किंचित्॥ धन्योहं धन्योहं प्राप्तव्यं सर्वमद्य संपन्नं॥२९४॥ धन्
योहं धन्योहं तृप्तेर्मे कोपमा भवेल्लोके॥ धन्योहं धन्योहं धन्यो धन्यः पुनः पुनर्धन्यः॥२९५॥ अहो
पुण्यमहो पुण्यं फलितं फलितं दृढं॥ अस्य पुण्यस्य संपत्तेरहो वयमहो वयं॥२९६॥ अहो शा
स्त्रमहो शास्त्रमहो गुरुरहो गुरुः॥ अहो ज्ञानमहो ज्ञानमहो सुखमहो सुखं॥२९७॥ तृप्तिदीप
मिमं नित्यं येऽनुसंदधते बुधाः॥ ब्रह्मानंदे निमज्जंतस्ते तृप्यंति निरंतरं॥२९८॥ ॥इति तृप्तिदी
पः समाप्तः॥

अहो पुण्यमिति॥ एवंविधपुण्यसंपादकमात्मानमनुस्मृत्य तुष्यति॥ अस्येति॥२९६॥ इदानीं सम्य
ग्ज्ञानसाधनं शास्त्रं तदुपदेष्टारमाचार्यं चानुस्मृत्य तुष्यति॥ अहो शास्त्रमिति पुनः शास्त्रजन्यज्ञानेन जन्यं
सुखं चानुस्मृत्य संतुष्यति अहो ज्ञानमिति॥२९७॥ ग्रंथाभ्यासफलमाह॥ तृप्तिदीपमिति॥२९८॥ ॥श्रीभारतीतीर्थ

विद्यारण्यमुनिवर्यतकिंकरेणरामकृष्णाख्यविदुषाविरचितातृप्तिदीपव्याख्यासमाप्ता श्री वृ

तृ·टि·
८५